नं० ४२७८-घ

भास्वरकस्य प्रथमपरिच्छेदः

नं० ४२७८-घ

पत्राणि ८९

(एकोननवतिः संख्याकानि)



42 7 8

1. 1-15

2. 1-10

3. 77-140

Total:-165

अतः सिद्धं सर्वत्र वर्तमानकालस्य [illegible]तावेवान्वय इति ।। अगततत्क्षणध्वंसे च लट: शक्ति
र्लुङुच्चारणस्य शक्यतावच्छेदककोटिप्रवेशः । तस्य तदुत्पादकीभूतोच्चारणस्य च स्वेव शा । ऋग
तोपलक्षणत्वात् ।। अथ यावल्लङादेर्लङ्त्वादिकमेव शक्यतावच्छेदकं । तद्विच्छिन्नस्य च
कालिकसंबंधेन प्रकृतस्त्राद्वोधोपधायकत्वमिति त्वं कृतौ संसर्गः ।। कृते आरब्धा
तत्वेन रूपेणान्वयबोधसत्त्वात् । तेन मैत्रीयज्ञयोगकालीनध्वंसकालेन चैत्रकृ
तयज्ञयोगापत्तिः । एवं लिङ्यौ विभूतानद्यतनत्वविशिष्टपारोक्ष्यरूपो भावनायां
मेवान्वेति ।। तत्र भूतत्वं लिङुच्चारणकालीनध्वंसप्रतियोगिक्षणवत्त्वं । तच्च कालि
कसंबंधेन लक्षतावन्वेति ।। इदं पान्तिमकृतावेव । तेनानेकदिनसाध्यपाकस्य च
ले प्याप्य कृतिध्वंसकालेन पपाचेति । लिट्प्रयोगः ।। लिङुच्चारणकालीनध्वंसप्र
तियोगित्वं वा ।। तदपि स्वरूपसंबंधेनान्तिमकृतावन्वेति ।। लिङुच्चारणकालक्षणपालङ्पः ।

1

।लिङ्वत्पूर्ववत्। तस्य च स्ववृत्तिध्वंसप्रतियोगित्वादिसंबंधेन तस्याभावः। ननु रात्रौ स्वप्नो भूतत्वा-
न्वयः पूर्ववत्। अनद्यतनत्वं तु आरब्धदिनादिभिन्नदिनवृत्तित्वं। परोक्षत्वं च प्रयोक्तृसाक्षा-
त्कारो मात्रपि तादृशाविषयता। स्मृतिज्ञानाविषयत्वं। इदं द्वयमपि भूतावेवान्वेति। परं तु आद्यं स्वा-
श्रयत्वसंबंधेन। द्वितीयं तु स्वसंबंधिधात्वर्थावच्छिन्नत्वसंबंधेन। चैत्रव। नैरूते: प्रयोक्तृसाक्षा-
त्कारविषयत्वेन तस्यां तदभावबोधस्य बाधितत्वात्। बुध्यतां वा सन्दूतो प्राप्तिस्तस्य साक्षात्कारविषय-
त्वस्य तस्याभावः। उत्तमपुरुषेपि अनवधानेन पारोक्ष्यं द्रष्टव्यं॥ शक्तिस्तु अर्थभेदप्रत्ययेन।
विशेषणविशेष्यभावे विनिगमनाविरहात्। लुङर्थस्तु पञ्चाद्यत्वाद्यनद्यतनत्वाविशिष्टं
भावित्वं। तत्र तु आरम्भकालीनप्रागभावप्रतियोगित्वं भवत्यादिकं पूर्ववद्विधाय स तावदन्वेति॥
लृङर्थोपि पक्ष्यतीत्यादौ अद्यतनानद्यतनसाधारणं भाविष्यत्सामान्यं तत्रैव॥ लेट् वेदएव॥
तदर्थस्तु लिङर्थ एव। सविधो पक्षतीत्यादौ॥ लोडर्थोपि लिङर्थ एव। ओं कादयः कल्पेप्रत्यया-
र्थः प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चेति सूत्रे चकारेण लोटोप्यनुकर्षणादिति॥ लङर्थस्तु न

८२

ति

यतनभूतत्वं अपवादित्यत्र भूते इत्यनुवृत्तावनद्यतने लङ् इति सूत्रात्। लिङर्थस्तु पूर्व
मेव निरूपितः॥ लुङ् अपाक्षीदित्यत्र भूतत्वमात्रं। लृङर्थस्तु हेतुहेतुमद्भावविवक्षायां क्रि
याऽतिपत्तिः। यथा यदि वृष्टिरभविष्यत्तदा सुभिक्षमभविष्यदित्यत्र वृष्टिसुभिक्षयोर्हेतुहेतुम
द्भावः॥ उभयोरनिष्पन्नत्वात् क्रियातिपत्तिः। अयं भूते भाविनि च॥ दृष्टो मया भवतः पुत्रो
ऽन्नार्थी चंक्रम्यमाणः। दृष्टश्चापरो द्विजोऽन्नार्थी यदि स तेन दृष्टोऽभविष्यत् ततोऽभो
क्ष्यत। न तु भुक्तवानन्येनाध्वने भूते विप्रयोगदर्शनात्। अनयोश्चार्थयोः साध्यदेवस्वरूप
संबंधेन भावनान्वयः। अत्र च सर्वत्र लकारेषु या कर्तावच्छेदकं तत् लकारार्थत्वं वक्ष्यमाणत्वा
ख्यानात् तद्धात्वर्थविशेष्यत्वं बोध्यं। सर्वधात्वर्थस्य भावनायामन्वय इति सिद्धं॥ ॥एवमु
पस्कृतविशेषरूपस्यात्मनेपदादेः स्वार्थः कर्तृगामिफलादिरूपः। सोऽपि कर्त्रादिसंबंधेन तस्मा
मेवान्वेति॥ यद्यपि स्वर्गयागादिरूपेण सोऽस्वर्गकामादिपदैरुक्तस्तथापि कर्तृगामित्वादिना तदभिधा
नमात्मनेपदादिनानुपपन्नं। अस्तु वा कर्तृगामित्वादिकमेव तदर्थः स च स्वाश्रयफलकत्वादिसं

दंधेन कृ सन्वयी। एवमेकत्वादिसंख्यायामपि तिवाद्युक्तायाः सामानाधिकरण्यादिसंबंधेन तस्यामे
वान्वयो न तु साक्षात्संबंधेन कर्त्रादि॥ भावप्रधानमिति स्मृतिसंकोचे प्रमाणाभावात्। कार्यका
रणभावादिकल्पनागौरवापत्तेश्च। तत्रापि कर्माख्यातस्थले स्वाश्रयसमवेतत्वसंबंधेन॥
चैत्रेणोदनः पच्यत इत्यत्र हि चैत्रेण पाकेनोदनः क्रियत इति विवरणानुसारात्कृतिरेवाख्या
तार्थः। पाकस्य च करणत्वं। चैत्रस्य कर्तृत्वं प्रतीयते। आत्मनेपदेन चात्र क्षणण्या कर्मा उ
क्तानुशासनानुरोधात्। फलं तु विक्लित्यादिनकस्यापि पदस्यार्थः। तस्यानन्यलभ्यत्वात्॥
अत एव फलमात्मनेपदस्यार्थः कृतिस्तु तिङर्थ इत्यप्यपास्तं। चैत्रः पचत इत्यादौ कर्ताव
पि शक्तेरावश्यकत्वेनानेकशक्तिकल्पने गौरवात्। चैत्रेणोदनः क्रियत इति तृतीयातः कृ
तेः एव कृविवरणाच्च। अतश्च तत्र कृतेरेवाख्यातार्थत्वात्तस्यामेकत्वाद्यन्वयः स्वाश्रयीभू
तोदनवृत्तिविक्लित्तिरूपफलजनकपाकजनकत्वसंबंधेन नानुपपन्नः॥ एवं भावाख्या
तेपि॥ चैत्रेण सुप्यते गमनेन स्थीयते इत्यादावाख्यातेन स्वापः क्रियत इति विवरणाद्भावे

2

योच्यते। स्वर्गी यतत इत्यत्राप्याश्रयत्वं। न तत्र लक्षणयापि प्रमाणाभावः। चैत्रो ग्रामं गच्छतीत्यादौ विशेष्या
न्वयस्य न गगनेन स्वर्गी यतत इत्यादौ विरोधस्य च भूतधात्वर्थान्वयस्यापि लक्षणां विना नोपपत्तेः। न च
तत्र धात्वर्थविशेष्यकएव बोधः। भावनाप्रकारकबोधत्वावच्छिन्नं प्रति आख्यातपदज्ञानत्वेन का
रणत्वस्यान्यत्र क्लृप्ततया सामिधोपजनीत्यादौ बहुश्रुतप्रथमातपदाध्याहारस्यैव धात्वर्थप्रका
रकशाब्दबुद्धित्वावच्छिन्नं प्रति धातुपदज्ञानत्वेन कारणत्वस्यान्यत्र क्लृप्ततया तन्निर्वाहाय भा
वाख्यातेप्याश्रयत्वलक्षणोपपत्तेः। तत्रापि भावप्रधानमिति स्मृतेस्तत्प्रत्ययार्थप्राधान्यस्य
त्याच भावनाया एव प्राधान्यं। अनुशासनबलादाख्यातेन कर्तृकर्मलक्षणावत् भाव-
पधात्वर्थस्यापि मुख्यत्वेन लक्षणा। तथा च गगननिष्ठं स्थितिमत् स्थित्याश्रयत्वमिति यावद्बो
धः। द्वितपवारं। स्थितिबोधस्त्वनुवादः साधुत्वार्थः। अतः स्वर्गी यतत इत्येकमपि स्वाश्रयाभे
तभावरूपधात्वर्थनिरूपितत्वसंबंधेनाश्रयत्वावगाहनेति। भावप्रधानमिति स्मृतेस्तु संभ
वेत्प्रमाणाभावात्॥ न चैवं धात्वर्थस्य द्वित्वादिविवक्षायां द्विवचनाद्यापत्तेः। प्रयोगाभा
वसहकृतानुशासनबलेनैव द्विवचनाद्यनापत्तेः। अतएव उष्ट्रासिका आस्यन्त इति मह

भाष्यकारवचनाद्द्वावपि वक्तृवचनं धात्वर्थकं ॥ एवं कर्मवत्कर्मणा तुल्यक्रिय इति सूत्रान्मूय
च्यते ओदनः स्वयमेवेत्यादौ यत्र स कर्मकर्तृ धातोर्यत्कर्मकारकं तदुच्छलरवे डोपाधिरूपकर्म
त्वाविवक्षया कर्तृत्वविवक्षा तत्राख्यातेन तस्यैव गुणत्वेन लक्षणयोपादानाद् आख्यातेन चरा
न्येव कृतेरुपादानात्तस्यामेव कर्तृत्वस्य स्वनिरूपकाविक्लित्तिरूपफलजनकपाकजनका
त्वसंबंधेन । ओदनस्य च स्व। निष्ठकर्तृत्वनिरूपकफलप्रयोजकत्वसंसर्गेणान्वय इति कोऽस्तु
नेयमनीता । सिद्धं भावनातिरिक्ताख्यातार्थस्य सर्वस्य भावनायामेव प्रकारतेति तस्यामु
ख्यविशेष्यत्वे ॥ धात्वर्थं प्रति तु तस्याविशेष्यत्वं प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयो
स्तु प्रत्ययः प्राधान्येनेति स्मृतिवचनादेवाविवादं । अत एव न तस्य प्रत्ययार्थान्तरं प्रति प्रकारता।
विशेष्यतामिषे संभवति प्रकारताभिन्नस्यान्याप्रसक्तेः ॥ अथ कोऽयं धात्वर्थो नाम ॥ अत्र
विवदंते ॥ तत्र मंडनमिश्रास्तावत् ॥ विक्लित्त्यादिरूपं फलमेव धात्वर्थः । तदनुकूलः फूत्कार
यत्नादिरूपो व्यापारसंघस्तु सर्वोऽपि व्यापारत्वेन प्रत्ययार्थः । फलस्य च तं प्रति प्रकारत्वमित्याहुः ॥

स्तित्व। गमनजन्यसंयोगाश्रयो गम्य इति प्रयोगानापत्तेः। संयोगाख्यफलस्य गमनत्वरूपत्वेन तदाश्रय
त्वाभावात्। गमनाश्रयो गम्य इति प्रयोगापत्तेश्च। न च स्वजन्यभावनावच्छेदकव्यापाराभिधानान्नैतादृश
प्रयोगाद्यापत्तिः। गम्यर्थनाशस्य गम्य इति प्रयोगस्येव [illegible]प्यापत्तेः। गमयर्थजन्यसंयोगाश्रयो गम्य इति प्र
योगानापत्तेश्च। स्वर्गध्वंसाख्यफलस्य यागजन्यत्वेऽपि तस्यैव फलभावनाकरणत्वेन स्वर्गसाधनत्वा
पत्तेः स्वर्गापि नश्यत्स्यात् इदं न स्वर्गोत्पत्त्युपपत्त्यावपूर्वकल्पनानापत्तेश्च। अतो व्यापारमात्रं धात्वर्थः फलं
द्वितीयार्थ इत्यन्ये। तदपि न। व्यापारत्वेन वाच्यत्वे सर्वधातूनां पर्यायतापत्तेः। क्रियात्वादिना विशेषरूपे
णोक्तत्वे विलक्षणगम्योः पर्यायतापत्तेश्च। पूर्वदेशविभागानुकूला क्रिया त्यजेरर्थः। उत्तरदेशसंयोगानुकू
लासेव गमेस्तु यदि क्रियामात्रं धात्वर्थः फलसामान्यं च द्वितीयार्थ इत्युक्ततयोः पर्यायतापत्तिः। अतो उभयं
लं व्यापारश्च धात्वर्थः। उभयत्र च प्रत्येकं शक्तिः। नातः ओदनादिपदार्थस्यैकदेशान्वयापत्तिः। प्रयोज्यत्व
जनकभावः संसर्गः। व्यापारविशेष्यकश्च बोधः। तत्रैकर्मकारकाकाङ्क्षितस्य सर्वकारकाणामन्वयः। कर्मकारके
स्य च फले। व्यापारश्च [illegible]रनिष्ठः फूत्कारादिरूपः [illegible]निष्ठः प्रयत्नादिश्च तत्त्वेन तत्त्वेन वाच्यः। अनुगतैकधर्माभा
रस्य निर्वक्तुमशक्तेः। न चैवं सर्वकारकाणां व्यापाराणां तत्त्वेन वाच्यत्वे नानार्थकत्वापत्तिरिष्टापत्तेर्वा सर्व
कारकाणां पृथङ्नानात्वापत्तिः। नानार्थत्वेऽपि फूत्कारकव्यापाराणां यदा विवक्षा तदा तेषामेव बोधः इत्यादाविव

पुंस्त्वस्य स्यात् तत्कारकस्यैव च तत्प्रथमान्तत्वं। अत एव स्थाली पचतीत्यादिप्रयोगो विवक्षाधीनः संगच्छते। अतः
सर्वोपि व्यापारो धात्वर्थः। आख्यातार्थस्तु यगादिविकरणस्थले कर्म॥ शवादिविकरणस्थले कर्ता। अकर्मक
धातूत्तर यगादिविकरणस्थले वर्त्तमानरूपो धात्वर्थ एव। लः कर्मणि च भावे चाकर्मकेभ्य इत्यनुशासनात्। सर्वेषां च धात्व
र्थप्रतियोग्यसंबंधेन गुणत्वं। भावप्रधानमाख्यातमिति स्मृत्या भावपदवाच्यधात्वर्थस्याख्यातार्थं प्र
ति प्राधान्येनोक्तेः प्रत्ययार्थप्राधान्यस्मृतिस्तु सुबादिविषये इति वैयाकरणाः। तदपि न। फूत्कारसादि
पचतीत्यतोऽप्रतीतेः। अभासमानस्य शक्यतावच्छेदकत्वायोगात्। फूत्कारादिकं विनापि चैत्रनिष्ठक्रियांत
रमादाय स्वतःसिद्धस्थाल्यामापाद्यमाने ओदने चैत्रः पचतीति प्रयोगापत्तेश्च। तत्तद्व्यापारस्य तत्त्वेन तत्त्वे
नानुभवे यागदानहोमादीनां वेति वादिविप्रतिपत्त्यनुपपत्तेश्च॥ आत्मानुभूयमानं पाकत्वयागत्वादिक
मेव तत्तत्फलोपधायकतावच्छेदकव्यापारवृत्ति अखंडोपाधिरूपं सामान्यं पच्यादिपदशक्यतावच्छेदकं। तत्तत्
त्वेन पाकः पाक इत्यादि अनुगतप्रतीतिः प्रमाणं फलोपधायकतावच्छेदकतया शक्यतावच्छेदकत्वेन वा
तात्सिद्धिः॥ फलोपधायकव्यापारत्वादेस्तु प्रमाणांतरतो बोधो न तु शाब्दबोधे। अखंडोपाधिरूपकर्म
त्वस्यैव तद्धर्मतया स्वाभाविकत्वात्। शक्यतावच्छेदकं च तत्तद्धात्वर्थं। पाकत्वादिकं वा। विक्लित्त्यनुकूलव्या
पारत्वस्यैव न तु तत्प्रयोजकयत्नादिरूपं। व्यापारं करोतीत्यादिना यत्नादेः पाकात्पृथक्कृत्य विवरणोपपत्तेः॥
विरहप्रमाणत्वात्। न च पचत्यादिसमभिव्याहृतधातोः फल एव शक्तिः फलव्यापारयोः पृथक्

अनेकत्वात् । किं कल्पने व्यापारविषयकत्वात् । किं प्रतिबन्धकल्पने वा गौरवात् । तस्मात् गमनवानिति प्रतीत्यापत्ति-
र्येन व्यापारस्य प्रतीतेरपि आवश्यकत्वात् । अत एव वि । क्लित्तिजनकव्यापारसमूह एव पाकपदार्थो नैतत् तदु-
नकयत्नादिरिति । तस्य एकत्वेन कृतिविषयमाणत्वेन पचपर्त्याभावात् । अत एव तेनः संयोगमात्रं पचत्यर्थो न
तु विक्लित्त्यनुकूलव्यापारसामान्यमिति विप्रलब्धम् । अग्निसंयोगानुकूलत्वाभाववत्त्वापि अनुकूलं विक्लित्त्यनु-
कूलत्वावच्छिन्ने तर्हि पचतीति प्रयोगात् । अत एव पाकात्यक्तविषयमाणे यत्नादेर्भासमानस्याभा-
नकरणे जिज्ञासाकायां परितोषात् ख्यातार्थत्वमेव । तस्मिन् पाकादेः प्रकारत्वं प्रकृत्यर्थत्वादेव । एवं
प्रत्ययार्थत्वाधारस्य स्मृतिरपि न संकोचिता भवति ॥ अत्र च पाकाद्यनुकूलव्यापारसामान्यस्यैव प्रत्य-
यार्थत्वे पाकं भावयतीति त्वदुक्तं भूधातुना व्यापारसामान्यवाचकेन विवरणात् । यद्यपि पाकं करोतीति
विवरणं तद्यपि कृतेर्व्यापारसामान्यवाचकत्वादनुकूलमेव । न हि करोतेति यत्नार्थकः । तथात्वे करोते-
र्यत्नार्थत्वे कर्मकतापत्तेः । फलव्यधिकरणव्यापारवाचित्वं हि धातोः सकर्मकत्वं । फलसमानाधिकरण-
व्यापारवाचित्वं हि चाकर्मकत्वं ॥ पचेः फलं विक्लित्तिरोदनवृत्ति व्यापारश्चैत्रवृत्तिरिति व्यधिकरणत्वात्सक-
र्मकः । स्थापयस्य फलं स्फुरणं तच्चैत्र एवेति द्वयोः समानाधिकरणत्वात् सोऽकर्मकः । तथा च करोतियत्योरेका-
र्थकत्वे तत एव करोतेर्यत्नार्थस्य फलव्यधिकरणत्वं फलसमानाधिकरणत्वं च विरुद्धं । अतः करोतेरपि

प्रति २

व्यापारसामान्यवाच्येव। अतएव रथो गच्छतीत्यत्र रथो गमनं करोतीति विवरणमपि संगच्छते। अतः करोतिर्यावद्धात्व-
र्थानां विवरणाद्व्याख्यातस्या। विफलोद्देश्यकं प्रकृतधात्वर्थातिरिक्तव्यापारसामान्यं वाच्यं॥ तच्च फलं क्वचिद्धात्वर्थः
क्वचित्स्वगतिरिक्तमन्यदेव वा॥ व्यापारसामान्यस्य च विशेषाकांक्षायां स्वरूपेतिकर्तव्यताकांक्षायां प्रयोगयोग्यादिना विशे-
षसमर्पणमिति पार्थसारथिः॥ वस्तुतस्तु तत्तत्फलभेदेन चानुगतैकफलघटितशक्यतावच्छेदकाभा-
वात् च तिपाके पततेः पाकं करोतीत्यादिविवरणाद्व्याख्यातस्य यत्नत्वमेव शक्यतावच्छेदकं। न च करोतिरनुकू-
लव्यापारवाची। वातरोगादिना स्पंदमाने चैत्रे स्पंदानुकूलविजातीयवायुसंयोगरूपव्यापारसत्त्वेपि नाहं स्पं-
दं करोमि अपितु वातरोगेण मम शरीरं स्पंदत इति प्रतीत्या करोतेर्यत्नार्थकत्वप्रतीतेः। यत्नत्वस्य शक्यतावच्छे-
दकत्वे लाघवाच्च॥ एवं रथो गमनं करोतीत्यादौ अनुकूलव्यापारे करोतेर्लक्षणेति ध्येयं॥ ननु भवन्मते
कर्तृकर्मत्वाविशेषात् करोतेर्भावयतिपर्यायत्वं। पर्यायत्वाभावेपि भावयतिशक्यतावच्छेदकव्याप्यफलाव-
च्छिन्नशक्यतावच्छेदकत्वेनापि भवन्मते कर्तृकर्मत्वानुपपत्तेः। न च करोतेर्यत्नार्थकत्वे यततेरिवाकर्मकतापत्तिः॥
सत्यपि यत्नरूपैकार्थत्वे धात्वर्थतावच्छेदकफलभेदेन सकर्मकत्वाकर्मकत्वव्यवस्थोपपत्तेः। यततेर्हि चैत्रनिष्ठा
क्रियैव यत्नसमानाधिकरणं फलं। करोतेस्तु तद्व्यधिकरणं उत्पत्त्याख्यं धात्वर्थतावच्छेदकं फलं। अतश्च
यथैव पततिगच्छत्योर्व्यापाररूपक्रियैक्येपि फलभेदाद्व्यवस्था। एवमिहापि व्यापाररूपयत्नैकत्वे

5

4

विफलभेदादेव सकर्मकत्वाकर्मकत्वव्यवस्थोपपत्तिः। तत्फलं पुनरूपमत्रापि प्रमाणं तथा च तमेव धात्वर्थविलक्षण-
त्वं धात्वर्थवाच्यमेवेत्यन्यदेतत्। वस्तुतस्तु। एतल्लक्षणस्य कौस्तुभोक्तरीत्या अव्याप्त्यादिदोषदुष्टत्वाद् विवक्षाविरह-
विशिष्टकर्माकांक्षधात्वर्थत्वमेव सकर्मकत्वं तदभावश्चाकर्मकत्वमित्येव कौस्तुभोक्तं लक्षणं युक्तं॥ अत्र चा-
कांक्षा समभिव्याहारात्मिकाशब्दधर्मः। तेन सत्यपि फले कर्तृत्वे यथा घटः कर्मत्वमित्यादौ वनाकांक्षत्वं घटमि-
त्यादौ वसाकांक्षत्वं तथैव पततेः कर्मानाकांक्षत्वं करोतेश्च कर्मसाकांक्षत्वमविरुद्धं। पच्यादेश्च स्वरूपेण
कर्मसाकांक्षत्वेऽपि विवक्षाविरहदशायां अकर्मकत्वाद् विवक्षाविरहेति॥ अत एव ओदनस्य पच्यत इति भावेऽपि
प्रयोगः। आसनादिधातूनां च स्वरूपेण अकर्मकाः इति मासादिकालयोगे कर्मसाकांक्षत्वात् सकर्मकत्वाच्च आस्यते॥
चैत्रेणास्यते मास इति प्रयोगापत्तिः। एवं चैतस्यैव यथा धातोश्चैत्रनिष्ठव्यापारवाचित्वरूपधर्मपुरस्कारेण
कर्मसाकांक्षत्वात् सकर्मकत्वं पुष्पनिष्ठव्यापारवाचित्वेन कर्मानाकांक्षत्वाद् अकर्मकत्वं द्रष्टव्यं। अतो यत्नार्थकत्वे यि-
रोतेः सकर्मकत्वात् तेनैव विरुद्ध प्रमाणाख्यातस्यापि यत्नार्थकत्वं॥ एवं च योगघटितज्ञानादिर्घटितप्रयततेः इत्या-
दौ यत्र यत्नस्य बाधस्तत्रानुकूलव्यापारस्याश्रयत्वस्य वा लक्षणेति द्रष्टव्यं॥ न च यथा आदौ च प्रतियोगित्वे लक्षणा।
तात्पर्यभाक् मुख्यसाधारण्येन सर्वत्र धात्वर्थातिरिक्तभाव नाख्यातार्थ इति॥ तस्याश्रयत्वं ... करोति

× शानजाद्यादेशोपस्थितलकारादपि शक्त्या भावनाबोधापत्तेः नापि ×
तिबाद्यादेशोपस्थित [illegible] लत्वं ×४

विद्यमानत्वात् तत्त्वं। अत एव भवतीत्यादौ करोतिनाविवरणं भावेन भावना भावाख्यातार्थ इत्येकारकाच
पः। परंपरासंबंधेनैव [illegible] तिप्रोक्तः॥ वस्तुतस्तु लाघवादाख्यातत्वमेव शक्ततावच्छेदकं। भ
वतीत्यादावप्याश्रयत्वलक्षणा। एवं च कारकाघटितेन शुद्धधात्वंतरकृत्यानापि॥ शक्ततावच्छेदकं
चनलत्वं। यत्र च कर्त्ता चेत्युपात्तलकारादपि भावनाबोधापत्तेः नापि तिबाद्यादेशोपस्थितलत्वं॥ ×४
नात्वेति वाच्यं नानेके [illegible] शक्ततावच्छेदकानामननुगमेनैव शक्त्यनेकत्वापत्तेः। तद्धरंतिप्र
त्यादिनैव प्रत्येकं शक्तिः। अत एव तिप्रत्यादिना लकारानुपस्थितावपि लाभबोधः। अन्यथाने केषु
तिबादिषु तत्तल्लोपशक्तिकल्पनाकारणे लकल्पने गौरवात्। एतेनाख्यातत्वमेवैकं शक्ततावच्छेदकं। तद
र्थकत्वं संबंधेनाख्यातपदवत्त्वं तद्वत्त्वं च। तिबादिष्वितितेरातीत्यप्रपासो। तिबादिषु आख्यात
पदवाच्यत्वाज्ञानेऽपि तिपूर्वेन पचतीत्यादौ ज्ञानेऽपि भावनाबोधात्। अतः सिद्धमाख्यातार्थो भावने[ति]॥
तस्यां च धात्वर्थस्य प्रकारत्वेनान्वयः॥ प्रत्ययार्थप्राधान्यस्य तु संकोचे प्रमाणाभावात्। भावप्रध
नमाख्यातमिति स्मृतेराख्यातार्थस्यैवैकेषु कस्यप्राधान्य। मित्यपेक्षितमते भावपदनाच्ये भावना
मात्रान्वमित्यपेक्षिताया विधायककर्त्तव्यतोऽप्रत्ययार्थप्राधान्यस्मृतिसंकोचकत्वानुपपत्तेः।
अतएवनिरूढास्मृतावस्यां भावपदेन वैयाकरणपरिभाषितधात्वर्थस्य न ग्रहणं। किंतु तो

मिवानचप्रत्ययार्थप्राधान्यस्य स्वतेः सुवाच्यर्थलिंगसंख्यादेः प्रकृत्यर्थं प्रतिप्रकारतयासंक्षोयावश्यकत्वेयं तत्र गुणत्वादे
प्रमाणांतरेण प्रकृत्यर्थं प्रति प्राधान्यं प्रमितं तदनुवादमात्रतया भावनाविषयेपि बाधे बाधकाभावः। प्रत्ययार्थस्य सह
तस्तयोस्तु प्रत्ययः प्राधान्येनेत्येकवचनश्रवणेन प्रत्ययार्थत्वसामानाधिकरण्येन प्रकृत्यर्थं प्रति प्राधान्यनिय
मात्तु वाच्यर्थलिंगसंख्यादीनामप्राधान्येपि क्षतिविरहात्। वस्तुतस्तु लिंगसंख्यादीनामपि प्रत्ययार्थतया न प्रकृत्य
र्थं प्रकारता। अपितु समानाभिधानश्रुत्याकरणत्वादिरूपप्रत्ययार्थांतरं प्रत्येवेति वक्ष्यते। अतः सिद्धं धात्वर्थ
स्य भावनायां प्रकारतेति। धात्वर्थस्यैव क्वचित्कारकार्थस्य स्वप्रकार्ये यथा यजेत्यादौ। क्वचित्कारकार्थस्य यथाग्नी
षोमीयं पशुमालभेतेत्यादौ यागः। क्वचित्कारकार्थसंख्यायास्तु। यथा एष्टेरूपतिष्ठते इत्यादौ आत्मनेपदानु
शिष्टेन समभिव्याहृतिरूपक्रियार्थविशिष्टमभिधानं। वस्तुतस्तु सोमेन यजेतेत्यादौ तत्र तद्विधिष्वपि द्विजे
नीयत्वत्वादिनैव तत्त्वस्यैतच्छक्यार्थान्वयोन्यत्रानुसंधेयः। तस्य च कृतौ संसर्गेणानुकूलत्वं। पचतिकं पो
करोतीति विपाकमेव कृतः स्यैव विवरणत्वेन संसर्गस्य प्रतीतेः। अतएव ओदनं पचतीत्यादौ पाकेनोदनं कु
रुतेति विवरणात्पाककरणत्वस्यापि प्रतीतेस्तस्यापि संसर्गत्वं। अतश्च कर्मत्वकरणत्वान्यतरसंसर्गे
णैव सर्वत्र भावनायां धात्वर्थस्यान्वयः। यद्यपि कृतिं प्रति पाकस्य करणत्वं बाधितं कृतिसाध्यत्वात्पाकादेः
तथापि स्वनिष्ठकरणत्वनिरूपकोदनोद्देश्यत्वेन संबंधेन पाकस्य कृतावन्वयात्करणत्वस्यापि संसर्गघटके

मतयासंसर्गस्योपपत्तिः। अस्ति चोदनस्यापि कृतावुद्देश्यतास्या विषयतेति नैतादृशसंसर्गबाधः। तत्र यप
त्रयि यश्रवणं तत्र द्वितीयां तप दाद्यश्रवणे पचति चैत्र इत्यादौ धात्वर्थस्यैव साधनतया द्वानेऽपि तस्य कर्मत्व
मेव। आख्यातोपात्त भावनायाः कस्तोत्यर्थत्वपात तद्द्देन सकर्मकत्वानिपमात्। अतएव अकर्मक धातुस्थ
लेऽपि आख्यातोपात्त भावनायाः कस्तेत्यर्थत्वपात तद्द्देव सकर्मकत्वानिपमात्। अतएवाकर्मकधातुस्थ
लेऽपि आख्यातोपात्त भावनायाः सकर्मकत्वमेव। अतएव तस्यास्तदृकाद्वापां स्वास्थ्यकामः शपीतेत्यादौ
कामपदेपात्तस्वास्थ्यादेः कर्मत्वेनान्वयः। स्वर्गकामपदेनैव लब्धायणे पा स्वर्गादेः धात्वस्थाकर्मकएवा
अतएव तत्र न भावनाकर्मत्वे द्वितीया सा तु धात्वर्थकर्मत्वेव सकर्मकधातुस्थले। यथा [illegible] नव हतो
त्यादौ तत्र तेऽपि प्रथमतो भावनायां कर्मत्वेनान्वयेऽपि पार्ष्ठिक धात्वर्थेऽपि कर्मत्वमिति तेषां धातूनां स
कर्मकत्वोपपत्तिः। अतो भावनायानित्यं सकर्मकत्वात्यवात चैत्र इत्यादि निरूढक स्थले भावनायाः
कर्मांकांक्षायां समानपदश्रुत्या धात्वर्थस्यैव कर्मत्वं। लौकिकवाक्यार्थावतस्य वैदिकर्थे विनदोषः।
वैदेतु विध्यंतरैकवाक्यतादिना स्तावकत्वाघसंभवेन स्वाध्यायविध्यपयुक्ततप्रसत्र योऽनन्वयापत्ते
र्येन लब्धारे रेव नहि दू संसेऽर्थकसंवानुष्ठापपापादिकल्पना भावनायाः स्वर्गादिभावांतरपरिक

ष्पेन यागधात्वर्थस्य तत्र करणत्वेनान्वयः। विधेः प्रवर्तकत्वोन्यथानुपपत्त्या तत्समभिव्याहृतायां भा-
वनायां। निष्कामकस्य सावद्यं याघात॥ घटं पटं चानयेत्यादौ चकारं विना कर्मद्वयादर्शनात्करणे
ते हि वाक्यातो यागे भावनायां अपि एककर्मत्व नियमेन प्रयाजादेरपि तस्याः कर्मत्वानुपपत्तेश्च। अ-
त एव यत्र विधिसमभिव्याहारस्य सत्ते अयमस्तेवा। द्वितीयादिनाभाव्यांतरं। त्रि द्विहं॥ यथा व्री-
हीनवहन्यात् ओदनं पचतीत्यादौ तत्र धात्वर्थस्य करणत्वमेव। यत्र तु तादृशस्थले अप्राप्त
करणांतरसंधात्वर्थस्य तत्र करणत्वादिनाप्राप्तिर्यागेनेतोहवनेन पशुकामस्य जगणोपेदध्नेंद्रि-
यकामस्य जुहुयादित्यादौ तत्राप्रयत्नप्राप्तकरणग्राह्यधात्वर्थानुवादमात्रं साधुत्वलिप्सया धात्व-
र्थनुतदर्थस्य करणत्वेनान्वयोनत्वा अपपत्तेना। कर्मत्वातिरिक्तस्याश्रयस्य। निर्वकृष्णराक्षयत्वेन
भावनायां निर्दिष्टस्य कर्मावरूद्धायां होमस्यापि कर्मत्वेनान्वये एककर्मत्वभंगापत्तेः।
अत एवोद्देश्यत्वनिमित्तावान्यमेदेपि एककर्मकत्वभंगएवदुग्धकतावीनक्रत्वंगौस्तुभादौ॥ टं
एककर्मकत्वं चनैककर्मकत्वं एककर्मत्वाश्रयपदत्वं वा। सर्वेष्वादृष्टं पूर्णमासेयष्टव्यानयेलौ-
देतदनापत्तेः। तत्र पुत्रादिष्टानि कर्मत्वादीनां कर्मत्वोश्रयपुत्रादीनां वा अनेकत्वात॥ नाघकर्मता
क

नच्छेदकैकत्वं । सुखं भ्योदनं कृत्वा ग्रामसाविसादे वी हि नौ धर्तास्यादौ वतद्भावापत्तेः । तत्र पुत्रत्वपशुत्वादी
नां तन्नादपूर्वसाधनतानां च कर्मतावच्छेदकानां च भेदात् ॥ किंतु एकवोधविषयकर्मत्वपर्याप्त्य
धिकरणतावच्छेदकधर्मानामेकेन पदेनैकस्यैव समूहालंबनात्मकस्यबोधस्यजननादेकत्वं कर्म
यं कत्वोपपत्तिः ॥ अथ पर्युषि अस्मान्नौ वा चं पचतः तत्र वाच्यपर्यायपर्जन्यमानत्वयोः कर्मत्वाधि
करणतावच्छेदकयोरेकवोधाविषयत्वाभावात् द्विकर्मकत्वापत्तिः । अतः पर्याप्तीति । तत्र द्वयो
8 रविभक्तस्यादिवत्तात्वादेरिव कर्मत्वादेरपि व्यासज्यवृत्तित्वावसायात् तत्पर्याप्त्यधिकरणता
वच्छेदकधर्मस्य अध्यर्युपर्जन्यमानोभयत्वस्य द्वयजन्यैकवोधविषयत्वेनैककर्मत्वोपपत्तेः ।
व दुपपादितं चैतत्कौस्तुभादौ ॥ एवं गृहं घटमानयेत्यादौ गृहकास्य घटे अभेदान्वयपातपद्द्वयेन
घटादेर्नकारादिरूपविशिष्टघटत्वलक्षणादेककर्मत्वोपपत्तिः ॥ एवं घटं जटं वानयेत्यादौ इतरे
तरयोगार्थकपुकारकरूपताप्रर्यप्राहकानुरोधेन द्वितीयांतपदद्वयेलक्षणयातदुपपत्तिः । यथा
चैवं सतिनिमित्तद्वयस्थले उद्देश्यानेकत्वनिमित्तकवाक्यस्यद्वयकाणा एककर्मकत्वभंगा
पत्तिस्तथा कौस्तुभे व्यक्तं ॥ लिंङ्यजा द्वितीयादिना भाव्यांतरभावनायामन्वयोगमुपात्ती

तत्र नञा त्वर्थस्य कर्मत्वमिति। यत्र तु तन्नोपात्तं धात्वर्थस्य चेष्टसाधनत्वं प्रमाणान्तरेणावगमितं तत्र स्ववाक्यविधे-
यगुणान्तरसत्त्वे धात्वर्थस्य कर्मत्वमेव। यथा दध्ना जुहोतीत्यादौ। न चैवं जुहोतीत्यादौ जुहोतेः सकर्मक-
त्वात्कर्मणि तत्र वरं यं भावे भावनायाद्विकर्मकत्वापत्तिः। सकर्मकस्यापि भावाख्यातद्वय कर्माविवक्षोपपत्तेः।
एतादृशे विषये पूर्वे प्रतिपादितत्वात्तृतीयान्तनामधेयश्रवणान्तरकरणत्वमेव। यथा समेद दर्शपूर्णमासाभ्यां जेयेत उ-
ष्ठः प्रवर्ग्येणेत्यादौ। यत्र तु तादृशगुणान्तरश्रवणासत्त्वं धात्वर्थस्यैव कर्मत्वे न त्वयोजनातिरात्र्यमनुवाद।
याविद्ध्या व्यापाः। तद्भावे तु न तृतीयान्तपातं यजतीत्यादौ कर्मान्तरमेव करणत्वेत्याह्याकरव्य तं। यत्र तु
इष्टसाधनत्वं प्रमितं स्ववाक्यवोधितुदादिविधानत्वेनीयान्तनामधेयश्रवणाय यथा सोमेन यजेत अग्नि-
होत्रं जुहोतीत्यादौ तत्र स्ववाक्यवइष्टविशेषानवगमेऽपि विधिबलेन भावनायाइष्टभाव्यकत्वावे-
गमादिष्टसामान्यस्यैव तत्र भाव्यत्वमंगीकृत्य धात्वर्थस्य करणत्वमेव अग्निहोत्रमिति द्वि-

तीयापि०। तत्र पूरणात्वलेनाणाथ्येचेति सा प्रदायिका। एतादृशे विषये सप्तमान पदस्य या भावने-
प्रतिपादितकर्मत्वात्वेव। सुतरामग्निहोत्रमिति द्वितीयान्तश्रवणे। न चेष्टसाधनत्वे नाज्ञाद निष्फ-
स्वतस्य कर्मत्वानुपपत्तिः। अनीप्सितकर्मत्वेनान्ययोपपत्तेः। न च विधेः प्रवर्तकत्वव्याघातः

विषयत्वाते इष्टभाव्यकत्वज्ञानस्य प्रवृत्तिं प्रति कारणत्वेपि शाब्दबोधं प्रत्यकारणत्वात् तदभावेपि होम
कर्मत्वे भावनाशाब्दत्वानोपपत्तेः। न च भाव्यत्वे नान्वितस्य तस्य भाव्यानाकांक्षत्वात् फलेनाकांक्षि
स्वर्गसाधनत्वबोधो नापत्तिः। साध्यत्वेनान्वितस्यापीष्टस्य नुरोधेन कृतिसाध्यत्वज्ञानव
त कृतिसाध्यत्वेन बुद्धस्यापि विधेयपक्षानुरोधेन वेष्टसाधनताप्रतीत्यर्थं वाक्यांतरेणाविष्ट
जन्यायेन वा बोधोपपत्तेः। अत उत्पत्तिवाक्ये धात्वर्थस्य कर्मत्वेनैवान्वय इति प्राभाकर
तमपि युक्तमिति तर्करसिकाः। सर्वथा सिद्धं धात्वर्थस्य करणत्वान्यतरत्वं स्वर्गे
ण भावनायाः प्रकारत्वेति। सांप्रदायिकास्तु धात्वर्थवृत्तिकर्मत्वकरणत्वान्यतरत्वेदेशा
यप्रतिपाद्यते। तस्यैवाभिरूपकत्वस्याभिरूपकोद्देश्यकत्वान्यतरसंसर्गेण भावना
यामन्वयः। ननु कर्मत्वादेः संसर्गत्वं। तथात्वे प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति
साहित्यस्य पदान्वयानुशासनेनैवोपपत्तेः। नहि पदार्थानुशासनं प्रवर्तमानाते ... न्व
यानुशासनेन कल्पयितुं शक्यते। अतः कर्मत्वकरणत्वादिरूपोन्वयोपि वृत्त्यैव पदार्थवि
षयाभासते। अत एव ज्योतिष्टोमेनेति तृतीयापि पदार्थविषयाभासमानकरणत्व

विशेष्यत्वस्य [illegible] निष्पादकतावच्छेदकबोधनिष्ठविशेष्यतानिरूपितत्वम् [illegible]

मे

नुवादिका संगच्छते। विशेषणत्वविशेष्यत्वयोः प्रकारतया भासमानत्वे [illegible] स्यैव तर्जितकत्वादिभ्यः ॥ त
त्सिद्धं धात्वर्थस्य सर्वत्र भावनायां प्रकारतेति ॥ स्वापदं अनुख्यातो धात्वाद्युपात्तावलिंगानन्व
यीति वक्ष्यते ॥ तेन वस्तुपदोपात्तधात्वर्थनान्वयः ॥ एवं सुवर्थस्यापि लिंगसंख्याभिन्नस्य तस्याभेदान्वय
प्रकारतेति द्रष्टव्यं ॥ तथा हि ॥ प्रथमार्थस्तावल्लिंगसंख्याभिन्नस्तस्यां प्रकारत्वेनान्वेति। न च त
स्याः साधुत्वमात्रार्थमनुसारतो न तदर्थमानाभावः। संबोधनेऽपि मुख्यत्वस्यापि भासमानत्वे
न तदसिद्धेः। तत्र प्रथमान्तं [illegible] बोधवत्त्वप्रकारकवत् [illegible] भिन्ननिष्ठवक्ति था। विषयतावत्त्वे वा। मुख्य
त्वं तदनुमितावच्छेदकं वा तदेव। आमि [illegible] देवदत्त गामानय इत्यादौ। देवदत्तश्चैत्रो गामानयतीत्यादौ च।
तस्यां प्रकारविधया नवत्या तादृशविषयतावत्त्वात् ॥ न च [illegible] सु बोधपि [illegible] स्यां संबोधनवाक्य
प्रयोगस्तत्र वस्तु प्रायाभिमति व्याप्तिः। न त्र वस्तु प्रायाप्ति बोधत्वेपि न। संबोधनस्य तत्र [illegible] तात्पर्यविषयता
भावेन तस्यां संबोधनस्य प्रमाणाभावात्। तात्पर्यविषयसत्त्वे नववस्त्वे वत्ता। अत एव चेतन एव संबो
धनं युक्तं। अचेतने तु लानवत्त्वात् तेषु पाषाणेषु लोके व्यवहारः। अत एव पाषाणा इत्यत्र आमि मुख्यत्वं कल्प्य
ते चेतनवत् प्रथमार्थे। तत्र बाधे यत्नं प्रातिपदिकार्थसंसर्गः। तत्रोऽत्र विषयत्वं निरूपकता

र्थां भावनान्वयः। तादृशे धात्वर्थविषयतास्वरूपसंबन्धो ध्वनिप्रत्ययस्य स्वनिरूपकधात्वर्थविषयत्वसंबन्धेन।
अंशे चाभिमुख्यत्वस्य च विषयत्वसंसर्गेण। चैत्रमैत्रः कीदृशादृशापवि आख्यिर्धिवतीत्यादि
ना क्रियापदाध्याहारस्यावश्यकत्वाद्धात्वर्थो धातुविधानः। चैत्रमैत्रो ग्रामं गच्छतीत्यादौ तु लौ
कर्त्ताख्यातार्थभावनाविषयीभूतायां भावनायां निरूढसंबन्धेन संबन्धो ध्वनिस्य स्वरूपसंबन्धेन
स्वनिष्ठव्यापारत्वप्रयोज्यत्वस्य वान्वयः। प्रतीत्यनुसारेणैतादृशफलयोगादेरेव बौद्धमपर्यालोच
कत्वात्॥ अत एव तत्र धर्मादौ तावि [illegible] लमेव संबोधनेरक्तिः प्रत्ययानुशासनबलात्। हेत्वर्थ
स्तिताश्रयत्वाहकं॥ व्यापारत्वप्रयोज्यतादि [illegible] णैव। चैत्रमैत्रो ग्रामाभिमुखो भवती
यन्तार्किकमतेऽपि भावनाविशेषस्यांशे धर्मार्थरूपान्यविशेषणत्वात्। तत्रात्वया
त्वोपादानसंख्यान्वयाभावाच्च। अतस्तैः संबुद्धिभिन्नस्तत्र मत्पदार्थानोपस्थि
तिरेव भावनान्वयप्रयोजिका। तथा च। न चैतदपि वक्तुं शक्यं। तैः ग्रामाभिमुखो भवे
द्यौतदनापत्तेः। न च तत्र त्वं पदाध्याहारः॥ तथा सौ ब्राह्मणास्त्वं पचतीत्यादौ गा

पत्तेः। न च युष्मदर्थकर्तृसंबुध्योरेकसंख्यात्वं। बहुत्वादेकवचनापत्तेः। एतेनाभिमुखत्वादेः स्वत्रिग्राति
पदिकार्थप्रकारत्वमित्यप्यपास्तं। चैत्रमैत्रः पचतीत्यादौ भावनाद्यन्वयापत्तेः। वस्तुतस्तु।। अ
स्मन्मतेऽपि चैत्रमैत्रः पचतीत्यादौ चैत्रे कर्तृत्वेन भावनान्वयस्य निर्वाहाय प्रथमस्य तत्र
स्यात्सर्वत्र संबोधनमेव संबुद्धिप्रथमायामर्थः।। ननु कर्तृत्वमपि। चैत्र पचेत्यादौ तु मध्य
मपुरुषस्थले आख्यातेन संबोध्यपाचकस्यैव कर्तृत्वेन लक्षणया न संबोध्यातिरि
क्तकर्तृत्वप्रसंग इति ध्येयं।। अतो द्वितीयादिसाधारण्येन प्रथमास्वरूपसुबर्थस्याप्रि
कारत्वमेव सर्वत्र युक्तं। न च प्रथमाया लिंगसंख्ययोरिव संबोधनार्थत्वेऽपि तद्धातिरि
क्तार्थाभावाच्चैत्रः पचतीत्यादौ प्रातिपदिकार्थातिरिक्तस्य विशेष्यभूतस्यार्थस्या
भावेन कर्मद्वितीयादिसाधारण्येन सर्वत्र प्रथमार्थस्य प्रकारत्वमिति वाच्यं। असं
बुद्धिप्रथमाया अपि अनुशासनबलेन लिंगसंख्यातिरिक्तार्थवाचकत्वावगतेः।।
तथा हि। पाणिनिमतं तावत्प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमेति

प्र

11

सत्त्वात्प्रातिपदिकार्थ एव । इदं हि लिङ्गाद्यंशो वाक्यस्यानुशासनवत् प्रातिपदि[illegible]र्थांशोपि शा

स्त्रस्य वाक्यानुशासनमेव । न च प्रातिपदिकार्थे प्रातिपदिके न प्रथमायाः साधुत्वमित्येवं परं वै

यर्थ्यापि त्वेचैरूप्यापत्तेश्च । अतश्च प्रातिपदिकार्थमात्रादिरेव प्रथमार्थः । न चैवमपि

तस्य प्रातिपदिके नैव बोधसिद्धेः प्रथमामात्रस्तादृशे साधुत्वार्थमनुकारणतया न प्रथ

मार्थस्यान्यत्र प्रकारतेति वाच्यं । प्रातिपदिकस्यैव प्रथमार्थविशेषतात्पर्यग्राहकत्वां

गीकारेण प्रथमार्थस्यान्यत्र प्रकारत्वे बाधकाभावात् । एतदर्थस्तुवच्य प्रकारकज्ञा

नबुद्धित्वावच्छिन्नं प्रति धात्वादिपदजन्योपस्थितेः कारणत्वमित्येवंविधकार्यकारण

भावे प्रथमातिरिक्तस्य प्रवेशे गौरवात् । प्रकृत्यर्थस्य प्रत्ययार्थं प्रति प्रकारत्वे प्रथ

मातः प्रातिपदिकातिरिक्तस्य प्रवेशे गौरवाच्च । आख्यातार्थभावनादेः प्रथमान्ता

र्थं प्रति प्रकारत्वे क्लृप्तेतरकल्पनापत्तेश्च । अतो [illegible]चवात् लुप्तवर्थत्वेन प्रथमार्थस्या

पि चैत्रादेराख्यातार्थभावनायामेव प्रकारता । अत एव चैत्रादेरविशेष्यकरूपार्थस्य

वैयाद्दे न प्रथमार्थे चैत्राद्यावन्वयः प्रकृतिप्रत्ययार्थयोर्व्युत्पन्नस्य भेदान्वयस्य बोधात् । अभेदान्वय
स्य चाव्युत्पन्नत्वात् ॥ अतः आहितपादकं तत्र प्रथमार्थ विशेषतासंबंध ग्राहकमेव । प्रथमोपस्थापिता
स एवाख्यातार्थभावनान्वयी । न चैवमाख्यातपदमादेतस्यान्वयः । नाष्टेरोह नामितमाली त्रि पाप दाघा
नारेऽपि च नीलो घट इत्यादावपि व्यवस्थितस्य अव्याहारस्यानुशासनविशिष्टस्य तत्त्वमनुपपत्तेः । नीलपदस्या
पि वृत्त्या माल्यादि हानी लगुणे नीलत्वजातौ वा रात्तस्य नतु तल्लाघवालम्भित लक्षणा यावानील लक्षणा किन्तु
गुणविशिष्टद्रव्यपरस्य तात्पर्यग्राहकत्वात् तदुत्तर प्रथमप्रयोगस्य तद्व्यवस्थापि न घटे न सहाभेदे
नान्वयोऽपि तु घटवृत्तिवास्तीत्यादास्थातो पत्त भावनायामेव । एवं व्युत्पत्तेरेव राजदयो धोषपत्तेः ॥ इत
र आख्याते प्रत्याधानां चक्षु नामा र्थस्याभेदसंबंधेन नामार्थेतारे त्वयपकल्पना तदुत्तरद्वितीया
पादिविभक्तेरपि साधुत्वार्थ कल्पना प्रकृत्यर्थस्य प्राधान्यायार्थे अन्वयव्युत्पत्तेः । विशे
षणवाचिविभक्ति भिन्ना विषयत्व कल्पनात् इत्येवं गौरवापत्तेः । न च नीलघट पीत भेदानुभ
वानुरोधेन गौरवोऽपि करणमापि न दोष इति वाच्यं । प्रथमादू यार्थस्य नीलगुणा

12

विशिष्टस्य घटस्य चकर्तृता। संसर्गेण शाब्दबोधे भावनाविशेष्यके जाते पश्चात् घटस्य परिच्छेद्यकीभूतगुरुणापेक्षा
कागुरुणाविशिष्टस्य च ज्ञानस्य पेक्षायामानस्यो भेदानुमेयदृष्टिपार्ष्टिकबोधमादयानुभवोपपत्तेः। न च शाब्दा
भासमानस्याभेदस्य वेदोत्थज्ञानविषयत्वाभावो दृष्टलौकिकाध्ययनीत्यचारुरायस्वेकुहायन्यामकृरूप
पिदोषाभावापत्तिः। वेदापोदितात्पर्यविषयकस्यमानस्यापि ज्ञानस्य वेदतात्पर्यविषयतयान्वेदो
त्यात्। नहि वेदटीत्तिविषयत्वं वेदजन्यशाब्दबोधविषयत्वमेव वा वेदतात्पर्यविषयत्वं प्रयोजकं।
तिथात्वेऽरूमांसेगृहान् भ्रातृरज्ञानामृतस्यैतत्यग्याभिधानीमादत्तेऽन्यत्र शाब्दबोधेमूत्राभ्या
भिधानीसंबंधमात्रस्यैवविषयीकरणात् तस्य च लिंगकत्वप्रभृत्येव शिष्टावेतद्वाक्यवैयर्थ्या
पत्तेस्तत्परिहारार्थमनुमीयमानस्य लैंगिकप्रभृत्यभावस्यापि वेदतात्पर्यविषयत्वानापत्तेः प
रिस्पष्टप्रापलेकल्लानापत्तिः। अतो वेदापदोशाम्यकृतान विषयत्वमेव वेदतात्पर्यविषय
त्वप्रयोजकं। तेन गुरोर्विशिष्टद्रव्यस्यैकहायन्याद्यभेदप्रसक्तेः तमेव। भावस्यकवेदप
रिणामपि। इष्टसाधनतासाध्यत्वस्य चलिंगत्वात् स्वर्गादिपदार्थस्य च कामनाविशेषणा
चेन इष्टस्याभेदान्वयानुपपत्तेः। इष्टसाधनीभूतयागानुकूलकृतिमान् स्वर्गकाम इति शा

दबोधस्यावश्यकत्वात्तदुत्तरमिष्टस्याभेदबोधो मानसएवास्त्वतात्पर्यविषयइति। एतादृशतात्पर्यविषय
त्वबोधएवचेष्टस्य गमिदीनस्य प्रतिबध्यो न तु शाब्दबोधइति त्वयापि स्वीकार्यमिति न समेतद्
ध्यावश्यकत्वात्। ॥४॥ यदि तु त्वयापि एतादृशादोषभियास्वगोसाधयित्वेनेमेवशात्याललक्षणायावालिङ्‍‍ स्यग
दिपदं यतात्पर्यग्राहकमित्युपेयते तदा मयापि नीलपदोत्तरप्रथमार्थस्य गुणविशिष्टद्रव्यस्याभि
न्नेघटस्य नीकत्वसंसर्गाभावेनान्वयबोधपदं यतात्पर्यग्राहकं घटपदोत्तरप्रथमार्थस्य स
न्निवृत्त्यैनेतिशाक्यवक्तुं। ततश्चाभेदस्यापि शाब्दत्वोपपत्तेर्न कोपिदोषः। केचित्तु विशिष्टवि
दौविशेषणविधाविधिवाधेकपदस्मरहकत्वपनानन्दभेदबोधकवाक्यान्तकत्वनाएवत्वाहुः।
सर्वथा प्रथमार्थस्य भावनापाधितीयादिसाधारण्येन भेदसंबन्धेनुप्रकारतेति। एतेनयेनीव
नामार्थस्य प्रथमार्थस्यैव नारख्यातोपात्तकृतत्रादावभेदान्वय इति वैयाकरणमतमप्यपास्तं।
व्युत्पत्त्यंतरकल्पने प्रमाणाभावात्। यत्तु स्तोकं पचतीत्यादौ नामार्थस्य स्तोकस्य धात्वर्थेऽभेदान्व
योर्थेऽभेदसंबन्धेन निरर्थकसुप्समभिव्याहृतनामार्थप्रकारकशाब्दबोधं प्रति निर
ल्मभामसमभिव्याहृतपदजन्योपस्थितिःकारणमिति कार्यकारणभावस्यावश्यकत्वात्तेनैव

13

चैत्रो दर्शनीय इत्यत्र यथा कर्त्रादावभेदान्वयोपपत्तिरिति चेन्न । चैत्रपदोत्तरप्रथमाया निरर्थकत्वस्य
पारिभाष्यादिविरुद्धत्वात् । स्वलिखनविरुद्धत्वाच्च । स्तोकं प्रातिपदिकार्थः स्तोकत्वं द्वितीयार्थोऽल्प
स्तायाश्चाभ्युपगते तस्य च साक्षात्संबन्धाद्यापाकादौ भावनायां वान्वयान्न निरर्थकत्वं पूर्व
त्वमिति नाऽदृष्टव्युत्पत्तिकल्पना नामार्थप्रसिद्धन्यायस्यापि स्तोकत्वविशिष्टः प्रातिपदिकार्थः स्तो
स्यापि मतेऽभेदो लदस्य द्वितीयार्थः । स च स्तोकप्रतियोगिकान्योन्याभावो वा भावरूपः स्तोकत्व
मेवातस्य च भेदसंबन्धेनैव वीपाकादावन्वयः । द्रव्यं वस्तिभिन्नवृत्तिद्रव्यत्ववाप्यपदे इति वक्ष्य
कत्वावच्छिन्नवृत्तिस्तोकत्ववान् पाकादिरिति शाब्दबोधः इति चेन्नामार्थस्याभेदसंबन्धेनान्वयः
वा द्वितीयाया निरर्थकत्वान्न वलदो रक्तादौ अभिया व्युत्पत्त्यंतरकल्पने द्वितीयायाश्च निरर्थ
कल्पने च न दोषः । तथा हि चैत्रो जानाति पा[illegible] दानामन्वय वलदो रक्ता वा: [illegible] सं
तीयाश्चनापपत्तेः । तत्रापि द्रुत्पविषयीभूतार्थकत्वात्वर्थस्य व्युत्पत्त्यंतरे लौकनामार्थप्र
कारत्वापत्तेः । लोद्रणापाः फलमुख्यत्वाच्च । अन्यथा लोहस्तरो छेदापत्तेः । तस्माद्युक्तः प

थमार्थस्यापि कर्तृत्वकर्मत्वरूपसंसर्गेणाख्यातार्थभावनामन्वयः। प्रातिपदिकार्थतात्पर्यग्राहकं लिंगसंख्या
न्वयश्च प्रथमार्थ इति सर्वमनवद्यं। संसर्गश्चाख्यातनिपातोपात्तकर्तृत्वकर्मत्वमेव ननु कृदाद्युपात्तमपि ते
न पाठकृच्चैत्रः पचतीत्यत्र चैत्ररूपप्रथमार्थस्य पाकक्रियायां कर्तृत्वसंसर्गेणोभान्वयोऽत एवाख्यातोपात्तभा
वनायामेव योग्यत्वात्। न तु लिंगान्वितचैत्रपदोपात्तायां पाठकृतौ। तस्याप्याख्यातोपात्तकर्तृत्वसं
सर्गेणायोग्यत्वात्। संसर्गाविवक्षानंगीकारे च चैत्रः पाठकेन पच्यते ओदन इत्यस्याप्यापत्तेः। अत एव चैत्रः
पाठकर्ता यद्यपि पाककर्तैव तन्निरूपितकर्तृत्वसंसर्गेणान्वीयेयाते। तयोः परस्परभेदभानं तु एवं
वत्। चैत्रस्य पाठकर्तृत्वाश्रयत्वभानं तु सर्वमतेऽनुमानसममेवा एवं पक्वे ओदनो भुज्यत इत्यत्रापि ओ
दनरूपप्रथमार्थस्य भोजनक्रियानिरूपितकर्मत्वसंसर्गेण भोजनकृतावेवान्वयो न तु पाककृतौ तत्क
र्मत्वेन पाककृतौ कृदुपात्तायां तथात्वे ओदनः पक्वे चैत्रो भुङ्क्त इत्यस्याप्यापत्तेः। अत एव तस्य अपि पर्यव
देवान्वयः॥ चैत्र इव मैत्रो गायति। विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतमित्यत्राख्यातोपात्तक
र्तृत्वकर्मत्वाभावेऽपि इवादिनिपातोपात्तकर्तृत्वकर्मत्वसंसर्गेण तदुपात्तभावनायां लिंगान्वय

14

विस्र

रहितायां चेत्तर्हि स्वार्थोऽप्रथमोपात्तयोरन्वयाद्यनिपातेति। तद्वंप्राप्तौ। निमित्तेऽप्रथमार्थं निरु
क्तः॥ कालाद्यनन्तरं॥ न प्रातिपदिकार्थे प्रथमा॥ तथा च प्रातिपदिकस्य तात्पर्यग्राहकत्वमा
त्रेण कृत्वेन पात्रत्वं वैधजनकत्वानापत्तेः। अपि तु अभिहितकारकत्वं मे व प्रथमार्थः॥
तास्मिन्नाख्यातकर्तृत्वादिरूपे प्रथमार्थे प्रातिपदिकार्थमात्रादिमहं संबन्धेनैवान्वेति। संख्या
दिकं च द्योतितं च न किं च तेन क्वापि व्युत्पत्त्यंतरकल्पना। कर्तृत्वादिकं च स्वतरां तपदे वाक्ये
यापुनः पदेनोत्तरत्रापि विस्तारः॥ न च कर्तृत्वादेराख्यातावगतस्य भावनायामन्वितत्वात्सु
न बोधनं वैयर्थ्यमिति चेत्र त्वावाधितत्वात्। तेन तस्याख्यातेनानवगमात्तादर्थ्यवाक्योपपत्तेः॥
न च तत्प्रत्यय आख्यातजन्यस्य सामानाधिकरण्यप्रकारकबोधस्य वैयर्थ्यं॥ तस्य प्रथमोप
त्तिप्रयोजनकत्वात्। तदर्थतया चापत्तेः। हि कृत्यपिधानमात्रं तथा प्रयोजकं। आख्या
तेऽपि चैत्रेण सुप्यते इत्यादौ क्रियाविवरणेन कृत्यपिधानात् प्रथमापत्तेः। अतः कर्तृत्वा

ध्या

नेव ८

ष्टमभिधानेऽत्र प्रथमाप्रयोजकं तत्र दात्तस्पा लब्धाया वाक्येष्व आदौ तः ॥ तस्मादभिहित कार
क संप्रथमा यः ॥ न च प्रासादं आसते पर्यङ्कं शेते इत्यादौ हृत्वत्र तयेन आधिकरणत्वेक
र्मत्वयोरुक्तत्वात्प्रथमापत्तिः ॥ तिङ् निपाताद्यभिहितकर्तृत्वे कर्मत्वयोरेवप्रथमाप्रा
प्तेः ॥ प्रासादमित्यत्र सन्निधान्तदुर्चे आधिकरणत्वाभिधाने सत्यप्यविरोधात् प्रथमि
त्यवक्तव्यत्वयेन कर्मत्वाभिधानेऽपि द्वितीयाऽविरोधात् ॥ तिङ् निपातोदाहरणानि पूर्व
मेव प्रदर्शितानि ॥ न चैवं तिङ् निपाताभिहिते कारके प्रथमा तद्भिन्नाभिहिते तु तृतीयादि
रिति पर्याप्तेस्तत्र लिङ्गं पञ्चोपि निचेमादौ प्रथमोपपत्ता वापि कर्त्र्यत्र कृदुपात्त
भावना च पे विवक्षितेत्वे तत्पादनोऽविच्छेण पाचको भुंक्ते इति प्रयोगापत्तेः ॥ न हि कृदुपात्तभा
वनायाः कारकाणामन्वयः ॥ तादृशे स्थले त्वभेदान्वयस्य पाचको भुंक्ते इत्यादौ तादृशीनामन्वयदर्श
नात् । अत एव तद्वदेव कर्तृकारकस्यापि अन्वयोपपत्तेस्तत्र च तिङ्पात्तक्रियायाश्च यापेक्षाभावेन प्रथमा
नुपपत्तेः ॥ कृदुपात्त क्रियायाश्च विशेषेण विवक्षितस्य चेत्तस्य तिङन्तेनाभिहित कर्तृत्वात्प्रथमा

दुर्वारः॥ एवमोदनं पच्यते भुज्यते चैत्रेणेत्यादावपि द्विलकारप्रयोगापत्तिः। एकद्वोगासङ्ख्यापत्तिर्वा। कर्मत्वस्यप्र
कारान्तरेणाभिहितस्याभिहितानुक्तत्वात्॥ शाब्दबोधश्चात्र चैत्रकर्तृकपाकानुकूलव्यापाराश्रयो भुङ्क्त इति॥ वारस्थ्ये
कर्तृत्वबोधश्च घटत्वकान्तघट इतिवन्नानुपपन्न इति चेन्न। अनभिहिते इत्यस्य स्वाद्याधिकरणा
दिभिरनभिहिते इत्यर्थात्॥ अतश्चात्रोक्ताकर्तृत्वकर्मत्वयोरेकस्यानन्वयापत्तिः। प्र
थमायास्तु तदन्वयविवक्षायां॥ तन्निमित्ताभाव एव॥ न चैवमाख्यातेन व्याप्तावक्षायां षष्ठ्यापत्तिरन
भिहित इत्यधिकारस्य प्रथमाविधायकसूत्रेण विच्छेदात्कर्तृकर्मणोः कृतीति कर्तृषष्ठीविधायक
सूत्रेनुवृत्त्यभावादिति वाच्यं॥ मण्डूकप्लुतिन्यायेन तत्रापि तदनुवृत्तेः सर्वसंमतत्वात्॥ अन्यथा
चैत्रः पक्वा भुङ्क्ते इति वक्तव्ये चैत्रस्य पक्ता भुङ्क्ते इत्यपि प्रयोगापत्तेः। अतश्चैत्रः पाचक इतिवद
चैत्रः पचमानो भुङ्क्ते इति क्रियायामेवान्वयः। परस्परमभेदान्वयबोधस्तु स्वरूपवतः। पचमा
नश्चैत्रो भुङ्क्ते इति भिन्नवचनत्वेनान्वय इत्यर्थः॥ न चैवं प्रथमायास्तिङ् निपातान्यतर
पदक्रियापदाश्रयवर्तिनः प्रातिपदिकार्थवृत्तीनामनेनाभ्यासार्थ [illegible] इत्यपि विरोधे अभावो प्रथमाति
समानाधिकरणत्वेन नियामकत्वेनैव तात्पर्येण पचन्निति [illegible] शाब्दबोधानयात्
विशेष्यभावो नाम प्रथमासमानाधिकरणप्रत्ययेन
प्रथमासमानाधिकरणात्॥

प्रथमासमानाधिकरणे इत्यनेन विशेषविधिना शतृशानचोरेव लटि प्राप्त्यापत्तेस्तिङादेर्लङादिमात्रविषयत्वेनापि सामान्यविधिव
शादुपपत्तेर्लटि तिङोऽभावापत्तेरिति वाच्यं एतादृशार्थस्य लटि शतृशानज्विधानमात्रेणैव सिद्धेः प्रथमासमानाधिकरणे इति पद
वैयर्थ्यापत्तेस्तत्परिहारार्थं प्रथमायाल्लघुपिशापक्षबलेन सिद्धेस्तस्याश्वस्त्रप्रयोजकीभूततिङादिसामानाधिकरण्यं विनानुपपत्तेर्ल
टि तिङः सिद्ध्युपपत्तेः अतएव ज्ञापकेन भाविति तिङादिकं निमित्तीकृत्य सर्वएव विभक्त्ययो लटि भवंतीति ज्ञाप्यते तत्र प्रथमाभिन्नवि
भक्तिसामानाधिकरण्ये शतृशानचोर्विधानेपि न तयोः सर्वप्राप्तिमतितिङादिबाधकत्वं एवं चाप्रथमासमानाधिकरणे इत्यस्य पर्युदास
त्वेपि लटि तिङां घसपत्तिः प्रसज्यप्रतिषेधत्वपक्षे तु सुतरां महाभाष्यकारीयान्यथितिङाद्यनुपपत्तिपरिहारास्तु दुरुपपादत्वादिह न लिखिताः सर्व
था तिङ् निपातो भयाभिहितकर्तृत्वयोः प्रथमेत्याह तयोश्च द्वितीयाद्यर्थे वेदेवाख्यातोपात्तभावनान्वय इति सिद्धं न चैवमपि प्रथमार्थस्याख्याता
र्थो द्वावेवान्वयो द्वितीयार्थोदेस्तु तद्धातूर्थेपीति कथं कार्यकारणभावैक्यमिति वाच्यं सुवर्थप्रकारकशाब्दत्वावच्छिन्नं प्रति लिंगानन्यपदजन्योप
स्थितेर्भावनाविशेष्यतासंबंधेन कारणत्वेपि प्रमाणांतरजन्याभिहितत्वाद्युपस्थितिरूपकारणांतरवशेन विशेषत्वलाभोपपत्तेरिति दिक् द्विती
यार्थस्तु कर्मत्वं द्वितीयेति सूत्रात् कर्मत्वं सोपि भावनायामेवान्वेति अत्र विवदंते तत्र नवीनतार्किकास्तावत् धात्वर्थानधिकरणत्वे सति
धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं पच्यादिधात्वर्थो हि फलावच्छिन्नो व्यापारः तदवच्छेदकीभूतफलस्य विक्लित्यादेर्देवदत्तादिनिष्ठव्यापारा
नधिकरणौ भूतौदनादि वृत्तित्वादोदनादेः कर्मत्वमिति लक्षणसमन्वयः गमनकर्मत्वस्य संयोगस्य ग्रामइव चैत्रेपि सत्त्वात् धात्वर्थानधि

भा०रू०

करणत्वेसतीति।चैत्रस्यगमनरूपधात्वर्थाधिकरणत्वात्।गमजन्यपूर्वदेशविभागशालिनि पूर्वदेशेगमनानधिकरणत्ववि
शिष्टधात्वर्थजन्यफलशालित्वस्यसत्वादतिव्याप्तिः।एवंवृक्षाद्भूमौपर्णंपततीत्यत्रपतनक्रियाजन्यसंयोगविभागरूपफ
लाश्रययोर्भूमिवृक्षयोरतिव्याप्तिरतोधात्वर्थतावच्छेदकेतिफलविशेषणं।एवंचगमेःसंयोगएव।त्यजेर्विभागएव।पततिस्यं
दताद्यादेर्नैवकिंचित्फलंधात्वर्थतावच्छेदकमितिनोक्तातिव्याप्तिः।फलपदंचक्रियाजन्यफलपरं।तेनधात्वर्थतावच्छेदक
व्यापारत्वमादायव्यापारेऽधोदेशमादायाधोशावयवेचनातिव्याप्तिः।पततेरधोदेशसंयोगःफलं।अतएवनरकंपततीति
इत्यपिप्रयोगइतिकेचित्।ननुग्रामंगमयतिचैत्रोमैत्रमित्यत्रमैत्रेकर्मत्वलक्षणस्यातिव्याप्तिः।मैत्रस्यगमनरूपधात्वर्थाधि
करणत्वात्।तच्चसनाद्यन्ताधातवइतिवचनान्णिजन्तस्यधातुसंज्ञत्वावगतेर्णिजन्तगमिधात्वर्थस्यगमनानुकूलव्यापार
स्यमैत्रेऽभावान्नातिव्याप्तिः।तदर्थतावच्छेदकस्यगमनाख्यफलस्यमैत्रेसत्वेनविशेष्यदलस्यापिसत्वादितिवाच्यं।तथात्वेग्राम
स्यकर्मत्वानुपपत्तेः।नचणिजन्तस्यधातुत्वेनपाक्षमप्यन्तकर्मत्वोपपत्तिः।तथात्वेपिपाचयतिचैत्रोमैत्रेणेत्यत्रापिमैत्रस्य
कर्मत्वापत्तेः।नचेष्टापत्तिर्द्वितीयान्तत्वापत्तेः।नचेष्टापत्तिर्द्वितीयान्तत्वापत्तेः।गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणा

तांणिचिगमेरपिधातुर

गा

मनि कर्त्ता स णौ इत्यनेन सूत्रेण गत्यादीनां धातूनामण्यन्तानां यः कर्त्ता स ण्यन्तानां कर्मेत्यर्थकेन गत्यादिभिन्नधातुयोगे
कर्मसंज्ञानिषेधेन तत्राप्राप्ता चेः कर्तृमात्राकत्वात् हृक्रोरन्यतरस्यामिति सूत्रेण हारयति कारयति धा
तुयोगे विकल्पेन कर्मसंज्ञाविधानात् हारयति कारयति कटं भृत्येन हारयति कारयति कटं भृत्यमिति प्रयोगद्वयावगते
स्तत्र भृत्ये धात्वर्थतावच्छेदकीभूतप्रयोज्यव्यापाररूपफलाश्रयत्वस्य सत्त्वेन कर्मत्वतदभावयोर्वक्तुमशक्यत्वात् सर्वदा
वा तेन स्वप्रकृत्यर्थभिन्नसमवेतक्रियाजन्यधात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमित्यप्यपास्तं। पाचयति मैत्रश्चै
त्रेणोत्पादनवति व्याप्तेरिति चेन्न तत्तत्क्रियाव्यक्तिभेदेन कर्मत्वानां भेदात्। इत्थं तथा उभयकर्मजसंयोगस्थले चैत्रस्य।
स्वभिन्नमैत्रसमवेतकर्मजन्यसंयोगाश्रयत्वाच्चैत्रो मैत्रं गच्छतीत्यत्र चैत्रस्य कर्मत्वापत्तेः। अन्यथा मैत्रस्यापि क्रि
यासामानाधिकरण्यात्वात् कर्मत्वानापत्तेः। अतस्तत्र क्रियांन भीं चेनैव लक्षणं निर्वाच्यं। तथा च चैत्रनिष्ठक्रियायाः परस
मवेतत्वाभावादेव न तत्र नातिव्याप्तिः। ननु स्वपक्रियाजन्यधात्वर्थतावच्छेदकफलशालि सत् पतपक्रियानधिकरणं
तत्तत्क्रियाकर्मेति च विशिष्यैव कर्मत्वरुक्तिः। परसमवेतपक्रियाजन्यधात्वर्थतावच्छेदकफलशालि पत्तत्क्रिया

भा०२०

कर्मेति वा। न रूक्तिः। पच्यादिक्रियामादाय फलन्द्रशासमन्वयः स्पष्ट एव। चैत्रो मैत्रं गच्छति मैत्रश्चैत्रमित्यत्र तत्तत्कर्तृ। नष्टक्रिया
मादाय गमयतीत्यादौ वगमिक्रियामादाय फ्रामप्यः नदनुकूलं व्यापाररूपं णिजर्थमादाय मैत्रस्य कर्मत्वं निराकृतं। घटं भा
वयतीत्यादौ तु णिजर्थमादायैवाभूधातोरकर्मकत्वात्। पाचयतीत्यादौ च पच्यर्थमादायैवोदनस्य तदनुकूलव्यापारमाद ननु
यमैत्रस्योक्तसूत्रानुरोधात्। अत एव तत्र। णिजर्थे कर्मक एव। अथवा तस्यापि ओदन एव कर्म विक्लित्यनुकूलत्वावि
शेषात्। एवं च हारयकारयतीति निरूपितकर्मत्व निरूक्तौ तृतीयांतपदानभिधेयत्वमपि देयं। तेन हरणादिकर्तुः पाक्षिक
कर्मत्वाविघातः। एवं गमयत्यादौ विवक्षितसमभिव्याहृतपदानभिधेयत्वं वा देयं। तेन ग्रामे गच्छति नरके पतत्तीत्यादिप्रयोग।
स्याप्युपपत्तिः। न चैवं कर्मत्वानां भेदात् द्वितीयायाशक्तिग्रहानुपपत्तिः। लाघवेन वृत्तित्वेनैव द्वितीयायाशक्तेः प
दार्थो नराणामसलभ्यत्वेन तत्र शक्तिकल्पनायां गौरवात्। तथा हि ग्रामं गच्छतीत्यत्र द्वितीयार्थो वृत्तित्वं धात्वर्थताव
च्छेदके संयोगेऽन्वेति। तज्जनकं गमनं धात्वर्थ एव। एवद्वितीयार्थोऽभावोपि प्रतियोगितासंबंधेन धात्वर्थ एव। ग्रा
मादिश्च प्रकृत्यर्थो द्विविधेपि द्वितीयार्थे। एवं च ग्रामनिष्ठाभावप्रतियोगिग्रामवृत्तिसंयोगगमनानुकूलकृतिमान् इत्यादिः

जनक १

शाब्दबोधः। पदि तु गमनात्यंताभावोपि चैत्रे त्रैकालिकाव्याप्यवृत्तित्वादाशंक्येत तदा यस्समवेतत्वाद्यन्योन्याभावघटितलक्षणामावा
प्रभेदो द्वितीयार्थः। स च प्रतीयोगितासमवायोभयघटितसामानाधिकरण्यसंबंधेन गमनाद्वयीतत्तश्च ग्रामनिष्ठभेदप्रतियोगिसमवे
तग्रामवृत्तिसंयोगजनकगमनेत्यादिः शाब्दबोधः। विस्तृतस्तत्र भेदध्याप्यव्याप्यवृत्तित्वमते चैत्रे गमनवद्भेदस्य तुल्यत्वात् द्वारण्याय
प्रकृतार्थे ग्रामो भेदप्रतियोगिताकत्वसंबंधेनावतिभेदश्चाभावीयविशेषणतासमवायोभयघटितसामानाधिकरण्यसंबंधेन गम
ने। ततश्च नामप्रतियोगिकभेदवत्समवेतग्रामवृत्तीत्यादिः शाब्दबोधः। अतएवाधेयत्वापरपर्यायवृत्तित्वार्थकसप्तमीतो वृत्तित्वार्थ
कद्वितीयाया भेदः। भेदाद्यर्थस्याधिकत्वात्। अयं चामरो विशेषोपद्वितीयार्थो वृत्तित्वधात्वर्थेनाद्यछेदकेफलएवाभिचेति। ससम
म्यर्थस्तु वृत्तित्वं धात्वर्थे नामार्थे वेति। एवं ग्रामस्य गंतेत्यात्योदौ कर्मषष्ठ्याः स्थलेपि बोध्यं। एवं चैत्रेण ग्रामो गम्यत इत्यात्मनेप
देव फलं भेदश्चाभिधीयते। तत्र प्रथमांतपदोपस्थाप्यो ग्रामः प्रतियोगिताकत्वसंसर्गेणाभेदाश्चमी। स च धात्वर्थगमने सामाना
धिकरण्यसंबंधेनास्व धात्वर्थो गमनं पुनरात्मनेपदार्थफलेजन्यत्वसंबंधेन। तथा श्रयत्वेन नामार्थे ग्रामे तत्तश्च चैत्रकृत
कग्रामभिन्नसमवेतसंयोगतनकगमनजन्यसंयोगाश्रयो ग्राम इत्येव शाब्दबोधः। चैयक्षश्रोदत इत्यत्र कर्मकृत्यत्ययस्थलेपि

ए

३

त्वं

भा०र०

।तत्रत्वपंविशेषः।ह्रदर्थेःप्रतियोगीघेदःवृत्तिँश्रा अपश्वा।ओदनोऽभेदेनप्रतियोगिनि।सचभेदेसच क्रियायांसाचकलह्यारावृत्तित्वे
तद्वाश्रयेसचाभेदनोदनइतिअनुभवानुसारेणाव्युत्पत्तिवैचित्र्यस्यादोषत्वात्।नचैवंभेदंप्रतियोगिनःप्रतियोगिताकत्वमात्रेण
वाचय॥अच्चपितावच्छेदकावच्छिन्नप्रतियोगिताकत्वेनवा।नाद्यः।विशिष्टव्यासत्पवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्यचैत्रेपि

3

सत्वेनस्वंगच्छतिचैत्रइतिप्रयोगापत्तेः।अवपितावच्छेदकावच्छिन्नप्रतियोगिताकत्वाव्युत्पत्तिभंगापत्तेश्च।नं।त्य४।जलंगच्छतिज
लंइत्यत्रजलत्वावच्छिन्नप्रतियोगिताकभेदस्यजलेअभावादितिचेत्।धात्वर्थतावच्छेदकफलाश्रयत्वंपद्यक्तेसत्याक्तित्वाव
च्छिन्नप्रतियोगिताकत्वेनप्रतीयोगप यस्यवाच्यत्वात्।एवंचव्युत्पत्तिभंगभियाजलपदेजलविशेषत्वा सरीकं।नत्तिइंवृत्ति
त्वंभेदश्चेद्धितीयान्तपदानभिधेयत्वादेरपिचाव्यत्वापत्तिः।तस्यान्यलभ्यत्वेनचाव्यत्वेगोचात्।कारयतिकठंमैत्रमित्यादि
प्रयोगस्येष्टत्वेनवाच्यतयाप्रचेशेप्रयोजनविरहुान्।भेदस्यःत्यवाच्यत्वेस्वंगच्छतीतिप्रयोगायतिवोधिकानलंतत्रथाकिं
चिद्वाधकं।अतोनतस्यचाच्यत्वमितिदिक्।एवंचपत्रेनाइत्राकर्मत्ववाधस्तत्रघठंजानातिमैत्रइच्छतिकुरुतेघठस्यज्ञाने
त्यादौसविषयपदार्थाभिधायिधातुयोगेद्धितीयाषष्ठ्योर्विषयित्वेलक्षणा।घठविषयकज्ञानाश्रयोमैत्रइतिवशाब्दबोधः

र्थतावच्छेदक इति।तवैवंतत्तिया।४

।मैत्रेण ज्ञायते घटः इत्यादौ तु कर्मप्रत्ययेन विषयत्वं लक्ष्यते मैत्र। अतज्ज्ञानविषयो घट इति च बोधः ज्ञातो घट इत्यादि कर्मक्ते तु
विषये लक्षणा तस्य च घटे ऽभेदा[illegible]य इति द्रष्टव्यं। नष्ट इत्यादौ प्रतियोगिनि। न त्वत्र परसमवेतत्वप्रवेशः वैयर्थ्यात्। स्वात्मानं जा
नामि आत्मानमात्मना वेत्सीत्यादिप्रयोगाच्च। एवं अकथितकर्मादौ कर्मप्रवचनीययोगनिमित्तकद्वितीयायां च लक्षणो वेत्याहुः।
अत्रेदमवधेयं। परदिफलावच्छिन्नव्यापारो धात्वर्थस्तदा द्वितीयार्थ इति त्वस्य पदार्थैकदेशे संयोगादौ कलेश्च पादेकदेशा
त्वयनिबंधनो व्युत्पत्तिभंग। न च चैत्रस्य न स्नावैत्रादन्य इत्यादावपि तदापत्तेः। षष्ठ्यर्थस्य परासंबंधस्य विशेष्यत्वानन्वयो
पपत्तेः। पंचम्यर्थस्यापि प्रतियोगित्वादेः परंपरासंबंधेनान्वयाङ्गीकाराच्च। किंच किमिदं फलस्यावच्छेदकत्वं। न ना चतत्तत्ता हेतु
ज्ञाकतावच्छेदकत्वं। विशिष्टज्ञानत्वोत्प्रमाणाभावात्। चैत्रो ग्रामं गमयति मैत्रमित्यादौ णिजर्थरूपधात्वर्थस्यावच्छेदकीभूते ग
मनरूपे फले अव्याप्तेः अथ फले पृथगेव धातोः शक्तिः। तस्य च व्यापारे प्रकारत्वमेवावच्छेदकत्वमिति चेन्न। तत्ता[illegible]यार्थ
करणात्वादौ पाचयति चैत्रेण णिजर्थविशेषणीभूते पाके चातिव्याप्तेः। अतः स्वरूपसंबंधात्मकमवच्छेदकत्वं पदार्थान्तरमेव
वाच्यं। न च बंधभिन्नाहकप्रमाणा। तपदश्रवणे द्वितीयामारणाकीतत्रैव कल्पते नान्यत्रेति को वाच्यं। न च तत्र शाब्दव्यवहारात्

रिक्तं किंचित्प्रमाणमस्ति। अतश्चतद्देवक्ष्यमाणविधपाकमेत्वादिकारकाणामखंडोपाधिरूपाणां द्वितीपादिवाच्यत्वव्यवस्थापन
योपपन्नेनाधेपत्वादेः तेकथंनुत्पनिकल्पनापादिकावाच्यत्वकल्पनापुक्तासमाश्रपितु। तथाहिद्वितापायास्तावद्वृत्तित्वेमेदेच
शक्तिरित्यनेकशक्तिरित्यनेकशक्तिकल्पनाधातोश्चफलावच्छिन्नव्यापारएका। फलेव्यापारेच नानाशक्तिरित्यनेकशक्तिक
ल्पना। अस्मन्मतेतुफलस्यवोक्तरवधपातन्नफलाच्छिन्नव्यापारवृत्तिपाकत्वगमनत्वादिकमेव तत्तद्धातुवाच्यताव
छेदकमितिनानेकशक्तिकल्पना। पुनश्चभवन्मतेफलस्यतत्वेनवोधेपूर्वदेशविभागस्यापिक्रियाजन्यत्वाविशेषात्पू
तीति भाष्यप्रयोगोपि संगच्छते। इतरथा स्वत्वनिवृत्तिपरस्वत्वापादनरूपदानेघटितसंप्रदानत्वे ईदृशप्र
योगाणां भाक्तत्वापत्तेः। अतो व कुतर प्रयोगसाधारणमिदं संप्रदानत्वं। अत्र च विप्राय गां ददातीत्यत्र फल
जनकत्वरूपं उद्देश्यत्वं निरूपितत्वं च चतुर्थ्यर्थः। प्रकृत्यर्थश्चतुर्थ्यर्थे फले निरूपकत्वे च स्वाभ्यात्संबंधेनान्
न्वेति। चतुर्थ्यर्थयोश्च परस्वत्वापादकस्य स्वत्वनिवृत्यनुकूलक्रियाया वा चिधात्वर्थतावच्छेदके परस्वत्वेन्व
यः। द्वितीयार्थवृत्तित्वस्यापि तत्र स्वस्वत्वे चान्वयः। तथा च विप्रवृत्तिसु खजनक वि प्र निरूपित गोवृत्तिस्वत्व

राम
८३

जनकगोवृत्तिस्वस्वत्वनिवृत्तिजनकक्रियाचैत्रनिष्ठेतिशाब्दबोधः। रजकायवस्त्रंददातीत्यादौसमर्पणएवधा
त्वर्थतावच्छेदकेचतुर्थ्यर्थयोरन्वयः। चपेटांददातीत्यत्रचपेटासंयोगएवधात्वर्थतावच्छेदकेतयोरन्वयः। वृक्षा
योदकंसिंचतीत्यत्रापिवृक्षनिष्ठपुष्टिजनकत्ववृक्षनिरूपितत्वयोर्धात्वर्थतावच्छेदकेउदकनिष्ठसंयो
गेन्वयइत्याहुः। तन्न। संप्रदानशब्दस्यावयवार्थबाधेनशक्त्यंतरकल्पनेप्रमाणाभावात्। ग्रामंगच्छती
त्यत्रचैत्रस्यगमनक्रियाकर्मकारकग्रामसंयोगजन्यसुखभागित्वेनसंप्रदानत्वापत्तेश्च। नचेष्टाप
त्तिः। ग्रामंगच्छतिचैत्रायेतिप्रयोगापत्तेः। नचाकडारादेकासंज्ञेत्यनुशासनात्संज्ञाद्वयप्रयुक्तकार्या
नुपपत्तेर्विप्रतिषेधेपरंकार्यमितिस्मृतिवशात्गच्छतीत्यत्रकर्त्राख्यानेकर्तृसंज्ञायाआवश्यकत्वेपूर्वा
याःसंप्रदानसंज्ञायाबाधोपपत्तिरितिवाच्यं। तथात्वेचैत्रेणग्रामोगम्यतइतिवच्चैत्रायग्रामोगम्यत

भा०र०
९४

९५

इति प्रयोगापत्तेः। कर्मत्वविवक्षायां तृतीया प्रयोगवत्संप्रदानत्वविवक्षायां चतुर्थी प्रयोगस्य निवार-
यितुमशक्यत्वात्। इतरथा ग्रामं गच्छति ग्रामे गच्छतीति विवक्षाभेदेन प्रयोगद्वयानापत्तेः। न चैवं चैत्रः स्व-
स्मै गच्छतीति वक्तृतादृशप्रयोगेइष्टापत्तिः। स्वस्मै गम्यत इत्यस्य स्वार्थं गम्यत इति विवरणानुरोधेन तादर्थ्य-
चतुर्थीत्वेन संप्रदानविभक्तित्वानुपपत्तेः। न चैवं तहो ब्रवारणाय क्रियाकरणत्वं कर्मविशेषणं। ग्रामस्य
नगमनकारणं देयं तु दानक्रियाकरणमिति नासंभव इति वाच्यं। हियस्यापि स्वत्वरूपफलांशोकरणत्वं
न तु तदनुकूलक्रियांश इति गमनेपि तद्विशिष्टं। गमनफलस्य संयोगस्यापि ग्रामजन्यत्वा विशेषा-
त्। विप्रनिष्ठफलसामान्याभावेपि विप्राय मया गौर्दत्ता न तु तस्य कश्चिन्नो गो जात इत्यादिव्यवहा-
रानुपपत्तेश्च। न फलघटितसंप्रदानत्वमुक्तं। यस्कर्मतिग्रहाभावेपि मानसा पात्रमुद्दिश्य जलम-

राम
९४

घ्येजलं क्षिपेदितिवचनात्साक्षाद्देश्यकत्यागमात्रेणास्मै मया दत्तानत्वनेन गृहीतेति व्यवहारः। सप्रदानस्यैव तत्रपर
स्वत्वोत्पभावेनाज्ञानत्वाज्ञाक्तएवेति न पूर्वमतेनादृष्टास्थले अव्याप्त्यापत्तिः। वस्तुतस्तु मतद्वयेपि पदार्थद्वयेपि
शक्तिद्वयकल्पनस्यावश्यकत्वादन्यमते च पदार्थैकदेशेफले प्रकृत्यर्थस्यान्वयापत्तेर्निरुक्तसंप्रदानत्वाद्या
नेपि च विप्राय गां ददातीति वाक्यात् विप्रसंप्रदानकं गोकर्मकं दानमिति बोधोदयाद्देयद्रव्यनिष्ठस्वत्वनिरूप
कत्वरूपं तत्समनियतमखण्डोपाधिरूपमेव वा संप्रदानत्वं युक्तमाश्रयितुं। तदेव च शाक्तः चतुर्थ्यर्थः। तत्र प्रकृ
त्यर्थो विप्रः साक्षादाधेयत्वेनैवान्वेति। तस्य च धर्मिग्राहकप्रमाणेन ससंबंधिकत्वकल्पनान्निरूपकत्वे
द्वायां कर्मणायमभिप्रैति इति सूत्रे त्कर्मकारकनिरूपितत्वावगते स्वनिरूपकदेयद्रव्यकर्मकदानानुकू
लत्वसंसर्गेण कृतावन्वयः। सुखदानातिरिक्ते च सर्वत्र भाक्तः संप्रदानव्यवहारः। अतएव प्रजापतये जु

हातीत्यादौ लक्षणायैव देवतात्वं प्रतिपाद्यत इति चतुर्थ्या न तद्धितापेक्षा यादौर्बल्यं। अत एव दानातिरिक्तयत्किंचित्क्रि
याजन्यफलभागित्वरूपमात्रसंप्रदानत्वेपि चतुर्थी विधानार्थं क्रियाग्रहणं कर्त्तव्यमिति वार्त्तिकं क्रियया यम
भिप्रैति सोपि संप्रदानसंज्ञः स्यादित्यर्थकं। न चैवं क्रियाफलशालित्वेन घटं करोतीत्यादौ चतुर्थ्यापत्तिः। परत्वे
न द्वितीयया चतुर्थ्या वा धात्। यत्किंचित् क्रियाजन्यफलशालित्वात्मकस्य भाक्तसंप्रदानत्वस्य सकर्मकाक
र्मकसाधारणस्य सकर्मकमात्रविषयिण्या द्वितीयया बाधोपपत्तेश्च। अत एव पत्येशेते इत्यत्र चतुर्थी अ
नएवं [illegible] सकर्मधातुविशेषस्थले पुनः प्रतिप्रसवार्थं गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामन
ध्वनीत्यनुशासनं चेष्टारूपगत्यर्थकर्मणि अध्वभिन्ने द्वितीयाचतुर्थ्यौ स्यातामित्यर्थकं ग्रामं गच्छति ग्राम
य गच्छति। अचेष्टायां तु मनसा हरिं व्रजति। अध्वनि तु पंथानं गच्छति। गंत्राधिष्ठित एव पथि अयं चतुर्थीप

१- मुख्यदानातिरिक्तसकर्मकधातुस्थलेपि पत्रवृक्षायोदकं सिंचतीत्यादौ कर्मकारकांतरं लब्धं तत्रापि वृक्षे निरुक्तभाक्तसंप्रदानत्वविवक्षा
१ यां चतुर्थी भवत्येव। कर्मांतराभावे तु द्वितीयैवेत्यत्रापि [illegible]

र्युदासः।यद्यनुक्तस्यासंख्याकार्यमिष्टुं इष्यते तदोक्तस्यैन पर्यवसानप्रतिष्ठितिर्भवत्येव चतुर्थी।अत्र सर्वत्राश्रय
त्वं लक्षणया चतुर्थ्यर्थः। तच्च स्वनिरूपकफलजनकक्रियानुकूलत्वसंसर्गेणाकृतावन्वेति। यत्तु कर्मणा यं
मभिप्रैतीति सूत्रस्य यथाश्रुतमात्यस्वरसात् कपदीके यदा हेति क्रियाग्रहणं कर्त्तव्यमिति वार्त्तिकप्रसा
ख्यानं कृतं तथाहि। सर्वोपियाकादिक्रिया ज्ञानेच्छादिक्रियाकर्म। तद्यत्र पत्ये शेते इत्यादौ चतुर्थ्यन्तप्रयो
गस्तत्रानुमेयां ज्ञानादिक्रियां भेदेन विवक्षित्वा तत्कर्मत्वेन शयनं विवक्ष्यते तत्र ज्ञानादिक्रियाकर्मका
रकीभूतशयनं प्रतिइप्सितत्वेन पत्युः संप्रदानत्वोपपत्तेर्नार्थो वार्त्तिकेन। यत्र तु घटं करोति ओदनं पच
ति मनसा हरिं व्रजति पंथानं गच्छति इत्यादौ द्वितीयाप्रयोगस्तत्र ज्ञानादिक्रियया अभेदं पाकादिक्रि
यायाविवक्षितत्वात् तां प्रतिइप्सिततमस्य पदे ओदनादेः कर्मत्वं। ग्रामं गच्छतीत्यादौ तु द्विविधप्रयोगस

त्वाद्देशमेहोभयविवक्षयोभयं संप्रदानस्य दानक्रियामात्रनिरूपितत्वानंगीकाराच्च। पमेशोतेङ स्मादाव
घेमुख्यसंप्रदानत्वाद्धि विरोधङ्मत्रे ~~[illegible]~~ तन्ना पच्यादिधातुभ्योऽज्ञानाद्यनुभवाभावा
त्। नियमेनारोपेप्रमाणाभावाच्च। विध्यभावेकारणाभावेनप्रयोगगतसाधुत्वज्ञानाभावात्तेनमेदाभे
दव्यवस्थाप्रतीत्यनुपपत्तेश्च। तस्मात्क्रियाग्रहणं कर्त्तव्यमितिनप्रत्याख्येयं। अतएवभाष्यकारेण
पिकर्मणोतिसूत्रे प्रत्याख्यानमपिगत्यर्थकर्मणीतिसूत्रेक्रियाग्रहणमपितत्रचोद्यतइतिग्रंथेनविधि
त्वंतस्याश्रितमेव। नचैवं गत्यर्थकर्मणीतिसूत्रप्रत्याख्यानानुपपत्तिः। धात्वर्थतावच्छेदकफलशालि
त्वरूपे। नत्समनियतेखंडोपाधौवाविवक्षितेद्वितीयां। तदनवच्छेदकक्रियाजन्यफलभागित्वेविवक्षि
तेचतुर्थीत्येवंउभयोपपत्तेः। सूत्रवैयर्थ्याभावात्। गमनजन्यस्वास्याधाश्रयत्वेनग्रामायगच्छतीति

प्रयोगोपपत्तेः। नचैवमध्वादिरूपापवादविषयेपि प्रयोगद्वयापत्तिः। तदंशेऽप्रत्याख्यानस्य भाष्यसिद्ध
त्वात्। भाष्यकारो हि अध्वादीनां न स्वरूपेणापवादविषयता। स्त्रियं गच्छती मन्त्राद्वितीयानियमानापत्तेः। अ
पितु संप्राप्तलेना। प्राप्त एव पंथा स्त्री चात्र पंथानं गच्छति स्त्रियं गच्छतीति द्वितीयानियम इति प्रतिपाद
यन्नु असंज्ञाप्तेकर्मणि द्वितीयाचतुर्थ्यौ भवत इति वक्ष्यमित्याह इति कारोपि अनुमेवार्थमनुमन्यते। पुनः
सिद्धं धात्वर्थतानवच्छेदकं यत् क्रियाफलं तदाश्रयत्वमेवेवमादिस्थले भाक्तसंप्रदानत्वमिति। एवं रुच्य
र्थानां प्रीयमाण इत्यनुशासनात् रुच्यर्थानां धातूनां योगे प्रीयमाणो रुचिविषयीभूत तद्यजन्यप्रीति
मानार्थोपि संप्रदानसंज्ञः स्या दित्यर्थकाच्चैत्राय रोचते मोदक इत्यादौ चतुर्थी। अत्र मोदकेपि धातु
योगस्य सत्वात्तद्वारणाय प्रीयमाण इति वास्तवं विशेषणं। इत्थं लक्षणया चतुर्थ्यर्थः। स्वनिरू

पकरुचिनिरूपकत्वेनाख्यातान्वयि। विषयत्वं लक्षणयाख्यातार्थः। अभिलाषो धात्वर्थः। चैत्रवृत्तित्वव
त् रुचिविषयत्वं मोदकवृत्ति इति शाब्दबोधः। एवं श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमान इत्यनुशासनादेषां
धातूनां प्रयोगे बोधयितुमिष्टः संप्रदानसंज्ञः स्यादित्यर्थकात् कृष्णाय श्लाघते ह्नुते तिष्ठते शपते इत्या
दौ चतुर्थी। श्लाघा स्तुतिः। ह्नुवनं संगोपनं। अत्र वास्तवे ज्ञापयितुमिष्यमाणत्वे सति चतुर्थी। अत्राद्य
धातुद्वये सकर्मकत्वात् कर्मत्वं चतुर्थ्यर्थः। द्वितीयावाधेन च चतुर्थी। तृतीयचतुर्थयोस्तु अकर्मकत्वात् षष्ठी
वाधेन संबंधश्चतुर्थ्यर्थः। अथवा सर्वत्र श्लाघादि ज्ञापनं लक्षणया धात्वर्थः। तं प्रति च कृष्णस्य कर्म
त्वेन द्वितीयाप्राप्तौ चतुर्थी। एवं धारेरुत्तमर्ण इति सूत्रेण धारयतेः प्रयोगे उत्तमर्ण उक्तसंज्ञः स्यादित्यर्थ
केन चैत्राय शतं धारयतीत्यत्र चतुर्थी। अत्र चतुर्थ्यर्थः उत्तमर्णत्वापरपर्याय प्रापपर्णीयत्वाख्यः संबंधः

तस्यत्वस्वनिरूपकत्वव्यकर्मकधारणानुकूलत्वेनकर्तान्वयः।तथाच चैत्रप्रसर्पणीयंशतंधारयतीत्यर्थः।य
द्यातु स्वत्वाख्यसंबंधविवक्षा तदा चैत्रस्य शतंधारयतीति प्रयोगः।नच मुख्यसंप्रदानत्वविवक्षायामेव चतुर्थ्यु
पपत्तेः सूत्रांतरवैयर्थ्यं।दानक्रियाभावेन तस्याप्राप्तेः।प्रसर्पणीयत्वविवक्षया तत्सार्थक्याच्च। अतएव
क्रियाग्रहणं कर्त्तव्यमिति मतेनापि न वैयर्थ्यं।एवं स्पृहेरीप्सित इत्यनुशासनात् स्पृहयतियोगे इष्टः संप्रदान
संज्ञः स्यादित्यैका पुष्पेभ्यः स्पृहयतीत्यत्र चतुर्थी।अत्र चतुर्थ्यर्थः कर्मत्वं संबंधत्वेन विषयित्वरूपः संबंधश्च
तयोश्च तात्पर्यानुरोधेनैकैकशः समुदितयोर्वा बोधः।तेन निरवकाशत्वात् संप्रदानसंज्ञा कर्मसंज्ञा शेषषष्ठ्यो
र्बाधिकेति वाक्यपदीयप्रभृतयः।वस्तुतस्तु ईप्सितग्रहणादीप्सिततमत्वप्रयुक्तकर्मसंज्ञायाः संबंधसामा
न्यप्रयुक्तशेषषष्ठ्या वा बाधे प्रमाणाभावः।तेन विषयित्वमेव तत्त्वेन चतुर्थ्यर्थः।तस्य च स्वाश्रयस्पृहावत्वे

भा०र०
९८

98

नाख्यातार्थे आश्रयत्वेन्वयः। कर्मत्वविवक्षायां पुष्पाणि स्पृहयतीति प्रयोगः। शेषत्वविवक्षायां चपुष्पस्य
स्पृहयतीति। अतएवस्पृहणीयशोभमिति कर्मत्वार्थकः प्रत्ययः कुमार्यइव कांतस्य त्रस्यंति स्पृहयंति चेति षष्ठी
प्रयोगोपि संगच्छते। हरदत्तादयोप्येवं। एवं क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपइत्यनुशासनात् क्रुधाद्यर्था
नां धातूनां योगे यं प्रति कोपः स संप्रदानसंज्ञः स्यादित्यर्थः। काद्यत्र वे क्रुध्यति द्रुह्यति ईर्ष्यति असूयति इत्ये
वं चतुर्थी। अत्र क्रोधोऽमर्षः द्रोहोऽपकारः। ईर्ष्याऽसहनं। असूया गुणेषु दोषारोपः। अत्राद्ययोरकर्मक
त्वात्तद्योगे षष्ठीप्राप्तौ अन्ययोश्च सकर्मकत्वाद्द्वितीयाप्राप्तौ चतुर्थीविधिस्तद्बाधेन। यं प्रति कोपइत्यनेन
यत्संबंधित्वं यत्कर्मत्वयोरुपादानात्। अतएव नात्र पूर्ववद्द्वितीयांतादिप्रयोगोपि। चतुर्थ्यर्थोपि स एव। वास्त
वा यत्र कोपस्तत्र कर्मत्वादौ चतुर्थी सर्वैः। कोपपदोपादानाद्भार्यामीर्ष्यति मैनामन्योद्राक्षीदिति अत्र न चतुर्थी।

राम
९८

अत एवाद्ययोर्धात्वर्थयोरुपसर्गयोगे कर्मसंज्ञाविधिः। मातुमभिक्रुध्यति अभिद्रुह्यतीत्यादौ क्रुधद्रुहोरुपसृष्ट
योः कर्मेत्यनेन। राधीक्ष्योर्यस्य विप्रश्नः इत्यनेन एतयोर्योगे विविधप्रश्नसंबंधिनि संप्रदानसंज्ञा स्यादित्य
र्थके न कृष्णाय राध्यति ईक्षते वा इत्यत्र चतुर्थी। विविधं पृष्टो गर्गः कृष्णस्य संबंधि शुभाशुभं पर्यालोचयतीत्य
र्थः। अत एव संबंधित्वं चतुर्थ्यर्थः। एवं प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्तेत्यनुशासनादाभ्यामुपसर्गाभ्यां परस्य
शृणोतेर्योगे पूर्वस्य प्रवर्त्तनरूपव्यापारस्य कर्त्ता संप्रदानसंज्ञः स्यादित्यर्थकात् विप्राय गां प्रतिशृणोति
आशृणोति वेत्यत्र चतुर्थी। अत्रान्यदीयप्रवर्त्तनापूर्वकोऽभ्युपगमो धात्वर्थः। वृत्तित्वं च चतुर्थ्यर्थः। स च
स्वाश्रयप्रवर्त्तनाजन्याभ्युपगमानुकूलत्वसंसर्गेण कृतावन्वेति। चैत्रनिष्ठप्रवर्त्तनाप्रवर्त्तितः प्रतिजा
नीत इत्यर्थः। एवं अनुप्रतिगृणश्चेत्यनेनाभ्यां परस्य गृणातेर्योगे पूर्वव्यापारस्य कर्त्तृभूतं कारकं संज्ञ

दान संज्ञं स्यादित्यर्थकेन होत्रे अनुगृणाति प्रतिगृणातीत्यत्र चतुर्थी। शंसपूर्वकं प्रोत्साहनं धात्वर्थः। वृत्ति
लरूपः संबंधः कर्मत्वं च चतुर्थ्यर्थः। तयोश्च क्रमेण शंसनप्रोत्साहनद्वारको भावनान्वयः। होता प्रथमं शंस
न्तिमध्वर्युः प्रोत्साहयतीत्यर्थः। एवं परिक्रयणे संप्रदानमन्यतरस्यामित्यनेन नियतकालं भृत्या स्वीक
रणं परिक्रयणं तस्मिन्साधकतमं कारकं विकल्पेन संप्रदानसंज्ञं स्यादित्यर्थकेन शतायशतेन वा परि
क्रीत इत्यत्र विकल्पेन चतुर्थी। करणत्वं चतुर्थ्यर्थः। एवं तादर्थ्ये चतुर्थी वाच्येति वार्त्तिकादुपकारकोपका
रकसाधारणं तदुद्देश्यकत्वलक्षणाया चतुर्थ्यर्थः। मुक्तये हरिं भजति। मशकेभ्यो धूम इत्यादौ। तच्च जनकत्वादि
नानेकप्रकारेण। तेन ब्राह्मणाय दधिति छतीत्यादावपि द्व्यवहारकक्रियासंबंधेपि चतुर्थी। अत एव क्रियाय
हणं कर्त्तव्यमित्यनेनापि निगतार्थत्वं। एवं क्लृपि संपद्यमान इत्यनेन प्रकृतिरूपं कारणं कार्यात्मनाऽऽपद्य

संपद्यते तदा कार्यवाचकाच्चतुर्थी स्यात्। क्लृप्यर्थकधातुयोगे मृद् घटाय कल्पते संपद्यते जायते वेत्यादौ मृद् घटा
कारेण परिणमत इत्यर्थः। इदं च कार्यकारणयोर्भेदविवक्षायां। पार्ष्ठिकाभेदविवक्षायां मृद् घटः कल्पत
इति प्रथमैव। जनिकर्त्तुः प्रकृतिरित्यनेन मृद उपादानत्वविवक्षायां तु मृदो घटः कल्पत इत्यत्र कारणे पंचमी।
कार्यत्वमभिहितत्वात्प्रथमैव। न च तादर्थ्ये चतुर्थीत्यनेन गतार्थत्वं। परिणामत्वत्वेन बोधस्य विवक्षितत्वा
त्। एवमग्रेऽपि। तथा उत्पातेन ज्ञापिते चेत्यनेन उत्पातत्वेन ज्ञापनविषये चतुर्थीत्यर्थकेन वातायकपिला विद्यु
दविद्योतत इत्यत्र चतुर्थी। तत्वेन ज्ञापकत्वं चतुर्थ्यर्थः। एवं क्रियार्थोपपदस्य च कर्मणि स्थानिन इत्यनेन क्रि
यावाचिउपपदं यस्य तस्य स्थानिनस्तुमुन्ण्वुल्रूपस्याप्रयुज्यमानस्य कर्मणि चतुर्थी स्यादित्यर्थकेन फले
भ्यो याति। नमस्कुर्मो नृसिंहायेत्यादौ चतुर्थी फलान्याहर्तुं नृसिंहमनुकूलयितुमित्यर्थः। इदं च तुमुनंतपदस्या

प्रयोगे। ण्वुलं तस्याप्रयोगे तु फलाभ्यामाहारक इत्यर्थः। द्वितीयापवादार्थं कर्मग्रहणं। प्रयुज्यमाने तु द्वितीयैव
अत्राप्रयुज्यमानाहरणनिरूपितं कर्मत्वं चतुर्थ्यर्थः। तस्य च स्वनिरूपकाहरणक्रियोद्देश्यकयानानुकूल
त्वं कृतौ संसर्गः। संसर्गकोटिप्रविष्टत्वादेव चाहरणस्याशाब्दत्वेपि न क्षतिः। एवं तु मर्थाच्च भाववचनादिस
नेन भाववचनाश्चेति सूत्रेण यो विहितस्तुमुना समानार्थकप्रत्ययस्तदंताच्च चतुर्थी स्यादित्यर्थकेन या
गाय यातीत्यत्र चतुर्थी। यष्टुं यातीत्यर्थः। स च प्रकृते घञ्। न च तादर्थ्ये चतुर्थी सनेन गतार्थत्वं तुमुनेव घञ्ञा
पितादर्थ्यस्योक्ततया साधुत्वार्थं प्रथमातिक्रमे कारणाभावेन प्रथमाप्राप्तौ चतुर्थीविधिसार्थक्यात्।
न च तथापि तुमुन्भाव एव घञ्ञप्युमाघतादर्थ्ये चतुर्थ्युपपत्तेर्भाववचनाश्चेति सूत्रवैयर्थ्यं। क्रियार्थायां क्रिया
यामुपपदे विशेषविहितेन तुमुना घञो बाधापत्तेस्तदंतोपरि तादर्थ्यचतुर्थ्यप्रसंगात्। अतस्तद्बाधार्थं घञ्ञा

६१

देरपि तदर्थे विधाने कृते प्रथमावाधार्थं चतुर्थी विधिसार्थक्यात्। एवं नमः स्वस्ति स्वाहा स्वधालं वषड्योगाच्चेत्यने
न एभिः शब्दैर्योगे चतुर्थी स्यादित्यर्थकेन हरये नम इत्यादौ चतुर्थी। उद्देश्यत्वं चतुर्थ्यर्थः। तस्य च स्वनिरूपकन
मनास्तित्ववैशिष्ट्यमाख्यातार्थे संसर्गः। उपपदस्य संसर्गघटकत्वेन तात्पर्यग्राहकत्वाच्चोपपदविभक्तित्वं। न च
तादर्थ्ये चतुर्थ्येव ब्राह्मणाय दधीतिवदुक्तार्थत्वं। नमःपदयोगे षष्ठीव्यावृत्त्यर्थत्वेन नमनार्थकपदान्तरयोगे वा च
तुर्थीव्यावर्त्तकत्वेन सार्थक्यात्। यदा तु नमनस्य धात्वर्थत्वं तदा धातोः संसर्गघटकत्वेन तात्पर्यग्राहकत्वात्कार
रकविभक्तित्वेन देवान् नमस्करोतीत्यादौ कर्मत्वार्थकद्वितीयापि नानुपपन्ना। प्रजाभ्यः स्वस्ति। अग्नये
स्वाहा। पितृभ्यः स्वधा। दैत्येभ्यो हरिरलं। पर्याप्त्यर्थकग्रहणमलं शब्दः। उपलक्षणं च प्रभुसमर्थशक्तादि
शब्दानां। अत एव तस्मै प्रभवतीति प्रयोगः। न त्वत्र षष्ठी व्यावृत्तिः। तेन प्रभुर्बुभूषुर्भुवनत्रयस्येति न विरोधः।

वषड्ङ्गाया। चकारः षष्ठीनिषेधार्थः। एवं मन्यकर्मण्यनादरे विभाषाऽप्राणिष्वित्यनेन प्राणिवर्जं मन्यतेः कर्म
णीति तिरस्कारस्वरूपेऽनादरे विवक्षिते चतुर्थी वा स्यादित्यर्थः। केन न त्वां तृणं तृणाय वा मन्ये इत्यत्र वैकल्पिकी
चतुर्थी तु। अत्र कर्मत्वं चतुर्थ्यर्थः। अत्र च तृणपदं तृणसदृशपरं। तथा च तृणसदृशकर्मभिन्नं त्वत्कर्मकं ज्ञान
मित्यर्थः। त्वत्कर्मकज्ञाने तृणसदृशकर्मकभेदश्च त्वयि तृणसदृशभेदे पर्यवस्यति। तत्र चानादरविवक्षा
यां त्वां तृणसदृशमपि न मन्ये इत्यर्थः फलितः। अतो नोक्तस्थलविवक्षायां चतुर्थीप्रयोगः। अत्र मन्य इत्यु
पादानान्मन्व इत्यत्र न चतुर्थी। तेन न त्वां तृणं मन्व इत्येव प्रयोगः। अत्राप्राणिष्वित्यपनीय नौकान्नशुक
शृगालवर्ज्येष्विति वक्तव्यं। तेनाप्राणित्वेऽपि न त्वां नावं न त्वामन्नमित्यादौ न चतुर्थी। प्राणित्वेऽपि च न त्वां शुने
मन्ये इत्यादौ भवत्येव चतुर्थी। न चैवं मन्यतिकर्मत्वाविशेषाच्छुनश्छदादपि चतुर्थ्यापत्तिः। अनादर इत्यस्य

कर्मविशेषणत्वेनानादरव्यंजके कर्मणि चतुर्थीविधिप्रतीतेस्तदप्रसंगात्तात्सिद्धं सर्वत्र चतुर्थ्या भावनान्वय इति
एवं पंचम्यपि तत्रैवान्वेति। तदर्थश्च अपादाने पंचमीति सूत्रादपादानत्वरूपः। तच्च ध्रुवमपायेऽपादानमिति
सूत्रनिरुक्तं। तथाहि। अपाये विभागे ध्रुवं निश्चलं क्रियानाश्रयं यत्तदपादानसंज्ञं स्यादिति सूत्रार्थः। तथा च
क्रियानाश्रयत्वे सति क्रियाजन्यविभागाश्रयत्वं अपादानत्वं। अस्ति चेदं वृक्षात्पर्णं पततीत्यत्र वृक्षे। पतन
क्रियानाश्रयत्वात्पतनक्रियाजन्यविभागाश्रयत्वाच्च। अत्रोदासीने घटे पर्णे चातिप्रसंगवारणाय दलद्वयं
क्रियानाश्रयत्वं च पतनक्रियावन्निष्ठभेदप्रतियोगित्वं। प्रतियोगिता सामान्यप्रवेशे च द्रव्यात्पततीत्यस्यानु
पपत्तेः। पतनवति पर्णे द्रव्यत्वावच्छिन्नभेदाभावात्। तथापि प्रकृतधर्मितावच्छेदकाश्रयपतनवत्यपि पर्णे द्वि[त्व]ा
द्यवच्छिन्नप्रतियोगिताकस्वभेदसत्वात्स्वस्मात्पततीति प्रयोगापत्तेः। प्रकृतधर्मितावच्छेदकावच्छिन्नप्रति

Margin: तो ... द्यपिसामा न्यतो ३

योगिता[illegible] प्रवेशो। यद्यत्किंचिद्व्यक्तित्वावच्छिन्नप्रतियोगितानिवेशो नैवव्यक्तियावन्निष्ठभेदप्रतियोगि
त्वंनिर्वाच्यं। तच्च पतमानपर्णव्यक्तिनिष्ठभेदनिरूपितयत्किंचित्पर्णव्यक्तित्वावच्छिन्नप्रतियोगिताकत्वमुदासी
नपर्णेपिस्रतः क्रियाजन्यविभागाश्रयतोपादानमिति न वृन्तात्पतितपर्णेपि पर्णान्तरे पततीतिप्रयोगः। अत्रविभा
गः परसमवेतत्वं च पंचमीार्थः। तत्र च प्रकृत्यर्थे वृन्तादिविभागे पदार्थैकदेशे भेदे च समवेतत्वप्रकृत्यर्थता
वच्छेदकाश्रयविभागाश्रयीभूतव्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंसर्गाभ्यामन्वेति। विभागः परसमवे
तत्वंच[illegible]जनकत्वस्वरूपसंबंधाभ्यां पतनाख्यधात्वर्थेन्वेति। तथा च वृन्तसमवेतविभागजनकं
यद्वृन्तत्वरूपप्रकृत्यर्थतावच्छेदकाश्रयविभागाश्रयीभूतव्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेणा
वृन्तवद्भेदाश्रयसमवेतं पतनं तदाश्रयः पर्णमिति शाब्दबोधः। प्रकृत्यर्थतावच्छेदकाश्रययत्किंचिद्व्यक्तित्वा

त

वच्छिन्नप्रतियोगिताकत्वस्यैव प्रकृत्यर्थस्य वृक्षस्य पंचम्यर्थभेदे संसर्गोक्तौ वृक्षात्पततिपर्णे पर्णात्पर्णं पततीति
प्रयोगापत्तिः। तत्सनस्यापि प्रकृत्यर्थतावच्छेदकपर्णत्वाश्रयत्वात् किंचिदुदासीनपर्णव्यक्तित्वावच्छिन्नप्रतियो
गिताकभेदवत् पतमानपर्णवृत्तित्वात्। पतमानपर्णवृत्तिविभागजनकत्वाच्च। अतश्च्याहृत्य धंप्रकृत्यर्थस्य स्त
भेदेन सहान्वये संसर्गघटकव्यक्तौ पतनजन्यविभागाश्रयत्वं विशेषणमिति केचित् मैयायकनव्याः॥
अन्ये तु गुरुभूतसंसर्गघटितव्युत्पत्तिविशेषकल्पनायां गौरवापत्तेः क्रियानाश्रयत्वेन क्रियावन्निष्ठभे
दप्रतियोगित्वं। अपि तु क्रिया वत्प्रतियोगिकभेदाश्रयत्वं। तदा क्रियाप्रतियोगितावच्छेदिका। भेद
स्याभावीयविशेषणतासंबंधेनैवापादानवृत्तिः। नचोदासीनपर्णादावपीति तथापादत्स्यर्थविशेष्यदलमुक्त
स्याचास्मिन्यत्तेविभागोभेदस्य पंचम्यर्थः। तत्र चाधेयतया प्रकृत्यर्थान्वयः। तयोश्च जनकत्वप्रतियोगितावच्छेदकत्वो

घ२ वि१

भयसंसर्गेणाधात्वर्थान्वयः। वृक्षवृत्तिभागजनकवृत्तिमद्भेदप्रतियोगितावच्छेदकपतनेसादिः शाब्दबोधः। अ
त्र च ग्रामादागतोऽश्वात्पततीत्यत्राश्वग्रामयोर्गमनपतनापादानत्वव्यावृत्त्यर्थं लक्षणे क्रियाविशेषविवक्षाद
ष्ट्या। तेन यन्निष्ठविभागजनकत्वेन तन्निष्ठभेदप्रतियोगितावच्छेदकत्वेन च या क्रिया विवक्षिता तत्त्वं तत्क्रि
यापादानत्वमिति निष्कर्षः। ततश्चाश्वपतनस्याश्व एव गमनस्य च ग्राम एवापादानमिति सिध्यति। अत एव प
रस्परस्मान्मेषावपसरत इत्यत्रोभयकर्मजविभागस्थले विभागस्यैकत्वेपि तत्क्रियाविशेषमादायैव त
दुभाश्रयस्य तदपादानत्वं निर्वचनीयं। विवक्षापदोपादानेन च पदानामेकरूपेणाविवक्षा अपि तु अवयवा
वयविभावस्यैव विवक्षा। तत्र वृक्षस्य पर्णं पततीत्येवं प्रयोग इति न तत्रापादानत्वप्रसङ्गः। यत्पदं च यत्पदाभि
धेयपरं। तेन वृक्षात्तस्मिन्नेव वृक्षे पर्णं पततीत्यत्र सप्तम्यन्तपदाभिधेयत्वविशिष्टस्यानापादानत्वं। न चैवम

पिवृक्षंत्यजती सत्र स्पंदते पर्णमित्यत्र । चवृक्षेऽपादानत्वापत्तिः क्रियाजन्यविभागाश्रयत्वात् क्रियानाश्रय
त्वाच्चेति वाच्यं । वृक्षेऽपादानत्वसत्वेपि वलीयस्या कर्मसंज्ञया धात्वर्थतावच्छेदकफलाश्रयत्वसत्वेन माग
कर्मत्वस्यापि सत्वाद्वितीयोपपत्तेः ग्रंचम्यप्रयोगात् । स्पंदते पर्णमित्यत्रासनाच्चलितो राज्याच्चलित इति
वद्वृक्षात्स्पंदते इत्यस्यापीष्टत्वात् । अतएव स्पंदते इत्यत्रापादानत्वव्याहृत्यर्थं क्रियापदं सकर्मकधातूप
दार्थपरमिति केचित् समाधानमपास्तं । वृक्षं त्यजती सत्रैवमतिवारणाच्च । अथ वोभयत्रापादानत्वव्या
वृत्त्यर्थं धात्वर्थतावच्छेदकफलभिन्नत्वं विभागविशेषणं वाच्यं । त्यजेर्हि विभागानुकूलो व्यापारो वाच्यः ।
अतो विभागस्य धात्वर्थतावच्छेदकत्वात्तद्भिन्नविभागाश्रयत्वाभावेन नवृक्षेऽपादानत्वप्रसक्तिः । स्पंदेश्च
धात्वर्थतावच्छेदकफलाभावेन तद्भेदस्याप्रसिध्येंनाह यावविभागाप्रसिद्धेर्नापादानत्वप्रसक्तिः । अथवा

पं

पप

न

भा०र०
१०४

104

यन्निष्ठविभागे तत्पदार्थनिरूपितेति लक्षणे विवक्षितं । दृष्टं सजाती यत्र वृक्षनिष्ठो विभागो विवक्षितो न तु वृ
क्षनिरूपित इति नातिप्रसंगः । वृक्षात्पर्णानि पतन्त्यत्र च प्रकृत्यर्थस्य निरूपितत्वं विभागे संसर्गः । तथा च वृ
क्षनिरूपितविभागजनकवृक्षनिष्ठभेदप्रतियोगितावच्छेदकं यत्पर्णमित्यादिः शाब्दबोधः । स्पंदत इत्यत्रा
पादानत्ववारणाय तु क्रियासकर्मकेवलक्षणे विवक्षिता । आसनाच्चलितः सार्थो धीयत इत्यादयः
प्रयोगास्तु वत्स्मरणावधित्वरूपपंचम्यर्थमादाय नेया इत्याहुः । वैयाकरणनव्या अपि केचिदेवं वस्तु
तस्तु गुरुभूतशक्यतावच्छेदकभेदेनानेकशक्तिकल्पनापेक्षया प्रकृत्यर्थस्य पंचम्यर्थद्वयान्वये व्युत्पत्ति
द्वयं पंचम्यर्थद्वयस्य च धात्वर्थान्वये व्युत्पत्तिद्वयमिति कल्पनापेक्षया चानुगतव्यवहारस्य साक्षिकत
याऽपादानत्वमखंडोपाधिरूपमेकं धर्मं निरुक्तापादानत्वसमव्यापकं कल्पयित्वा तत्रैव पंचम्याः

न

राम
१०४

शक्तिं कल्पयित्वा तस्मिंश्च प्रकृत्यर्थान्वयो येकां तस्य चाख्यातार्थान्वयो येकां व्युत्पत्तिं कल्पयितुमुचितं। प्रकृत्यर्थस्य
च तत्राधेयतयान्वयः। तस्य च स्वनिरूपकधात्वर्थानुकूलत्वसंसर्गेण कृतावन्वयः। तदेवं प्रचुरप्रयोगादपा
दानत्वं पंचम्याः शक्यं। यत्र तु वृक्षाद्विभजत इत्यादौ विभागजन्यविभागाश्रयत्वाभावान्नोक्तापादानत्व
संभवस्तत्र लक्षणया स्वस्वरूपसंबंधविशेषरूपमवधित्वं पंचम्यर्थः। तत्रापि त्वपाये विभागे ध्रुवमवधिम
तं त्वपादानसंज्ञं स्यादिति वाक्यपदीयादौ स्पष्टं व्याख्यातं। तस्यापि धात्वर्थघटितसंसर्गेण भावनान्वयः।
वृक्षनिष्ठावधि ता निरूपकविभागानुकूलकृतिं कर्तृवृत्तिरिति च शाब्दबोधः। स्वनिष्ठविभागावधित्व
स्य स्वस्मिन्नभावाच्च न स्वस्माद्विभक्त इति प्रयोगः। सर्वेष्वपि पूर्वोक्तेषु अवधित्वमेव पंचम्यर्थस्तस्य च क्वचि
द्धात्वर्थजन्यविभागद्वारकोन्वयः।

[illegible]। क्वचिद्धात्वर्थद्वारकइत्यपि वा सुवचं। वलाहकाद्विद्योतते विद्युदित्यत्र तु निःसरणजन्यवि
द्योतनं लक्षणया द्युतेरर्थः। तत्र एकदेशे निःसरणे पंचम्यर्थान्वयः। एवं कुसूलात्पचतीत्यत्रापि आदानज
न्यः पाकः पचत्यर्थः। आदाने च पंचम्यर्थान्वय इति परकीयाः। स्वमते तु लक्षणायां एकदेशान्वये च प्रमा
णाभावात् पंचम्यर्थोऽपादानत्वादिरेव स्वनिरूपकनिःसरणादिजन्यविद्योतनाद्यनुकूलत्वसंसर्गेण
कृत्यन्वयी। कुतो भवानित्यादौ प्रश्ने पाटलिपुत्रादिरुत्तरे च आगत इत्यध्याहारेणान्वयो बोध्यः। यत्तु जु
गुप्साविरामप्रमादार्थानामुपसंख्यानमिति वार्त्तिकमेतेषां योगे पंचमी वाच्येत्यर्थकं तन्नाद्दारण
कानुशासनं। अतोऽधर्माज्जुगुप्सते विरमति अधर्मात्प्रमाद्यतीत्यादौ पंचमी। अत्राद्ये निंदा धात्वर्थः। त
च्चेह विगानं। पंचम्यर्थो विषयितासंबंधकसमर्थस्यानिरूपितत्वसंसर्गेण तत्रान्वेति। तच्च स्वाश्रयविगानवत्व

संबंधेनाख्यातार्थे आश्रयत्वे। द्वितीये करणानंतरमकरणं धात्वर्थः। पंचम्यर्थः पूर्ववत्। आख्यातार्थ आश्र
यत्वं पंचम्यर्थस्य च कृतिद्वारकोऽन्वयः। अधर्मविषयककृत्यनंतरकालीनाधर्मविषय
ककृत्यभावाश्रयत्वं इति शाब्दबोधः। तृतीये पंचम्यर्थो विषयित्वमेव। अनवधानं धात्वर्थः। आख्यातार्थ
आश्रयत्वमेव। स्वाश्रयानवधानवत्त्वमाश्रयत्वे पंचम्यर्थस्य संसर्गः। एवं भीत्रार्थानां भयहेतुरित्यनु
शासनाद्भीपार्थानां त्राणार्थानां च धातूनां योगे भयहेतुरपादानसंज्ञः स्यादित्यर्थकाच्चोराद्बिभेति चो
राद्धनिकं त्रायते इत्यत्र पंचमी। अत्र हेतुमत्त्वं पंचम्यर्थः। आद्ये भयं धात्वर्थः। द्वितीये भयाभावानुकूलो
व्यापारः। ननु भयाभावमात्रे केषांचिदुक्तं तथात्वे धनिकस्य त्वन्मते धात्वर्थतावच्छेदकफलाभावेन तदा
श्रयत्वरूपकर्मत्वानुपपत्तेः। अस्मन्मते तु व्यापारस्य भयाभाव एव कर्मेति तदुपपत्तिः। आख्यातार्थ आ

श्रयत्वं। स्वाश्रयधात्वर्थवत्त्वमुभयत्रसंसर्गः। तथा च चोरहेतुकभयाश्रयत्वं चोरहेतुकभयाभावानुकूलव्यापा
राश्रयत्वमित्येवं च शाब्दबोधः। कस्यचिद्बिभ्यति देवा आजातरोषस्य संयुग इत्यादौ तु कस्य संयुग इत्येवं संयुगघटि
तसंबंधेन भावनान्वयात्षष्ठी। न चैवं संयुगस्यैवापादानत्वापत्तिः। परयाधिकरणसंज्ञया बाधात्। अधि
करणत्वाविवक्षायामिष्टापत्तेः। एवं पराजेरसोढ इति सूत्रात्पराजेर्धातोर्योगे असह्योऽर्थोपादानसंज्ञः स्या
दित्यर्थकादध्ययनात्पराजयत इत्यत्र पंचमी। अत्र धात्वर्थो निष्ठपंचम्यर्थो जन्यत्वं। अध्ययनजन्या निष्ठा
श्रयत्वमिति शाब्दबोधः। शत्रून्पराजयत इत्यत्र तु शत्रुनिष्ठा निष्ठसाधनत्वमिति वो धात्वर्थः द्वितीया। केचित्तु अ
सन्तं धात्वर्थः। अध्ययनं न सहत इति विवरणा ऽदित्याहुः। वारणार्थानामीप्सित इति सूत्राद्वारणार्थानां
धा॰हरू त्वनां योगे ईप्सितोऽर्थोपादानसंज्ञः स्यादित्यर्थकाद्धर्मानुकूलव्यापारो यत्नश्चाख्यातार्थः। पंचम्य

वेभ्यो गां वारयतीत्यादौ पंचमी। अत्र पंचम्यर्थः प्रतियोगित्वं। द्वितीयार्थो वृत्तित्वं। धात्वर्थश्च विनाशानुकूलव्यापाराभावा १

र्थस्य स्वनिरूपकविनाशघटितः संसर्गः। द्वितीयार्थस्य धात्वर्थतावच्छेदकीभूतव्यापाराभावद्वारकः। तथा
च यववृत्तियोगिकविनाशानुकूलो भक्षणादिरूपो यो व्यापारस्तस्य योगो वृत्तिर्यो भावस्तदनुकूलो व्यापा
रो देवदत्तवृत्तीति बोधः पर्यवसितः। अत्र चयवानां वस्तुतः ईप्सितत्वात् पंचमी। नचैवं गोरपीप्सितत्वा
त्संचम्यापत्तिः। तस्येप्सिततमत्वेन कर्मत्वोपपत्तेः। एतदर्थमेव हि कर्तुरीप्सिततममिति तमग्रहणा
मिसुक्तं कौस्तुभे। धात्वर्थतावच्छेदकीभूतस्य विनाशानुकूलव्यापारध्वंसस्य योगमात्रवृत्तित्वात्तत्रैव
द्वितीया। एवं कूपादन्धं वारयतीत्यत्र वृत्तित्वं पंचम्यर्थः। पतनानुकूलव्यापाराभावानुकूलो व्यापारो
धात्वर्थः। तथा च कूपवृत्ति यदन्धः प्रदेशावच्छिन्नसंयोगानुकूलक्रियारूपपतनं तदनुकूलो यो ऽन्धवृत्ति
व्यापाराभावस्तदनुकूलव्यापारानुकूलयत्नश्चैत्रवृत्तीति बोधः पर्यवसितः। एवं पुष्पेभ्यः स्पृ[illegible]तपं

भा०र०
१०७
107

वारयतीत्यत्रापि शुष्कीभावानुकूलव्यापाराभावानुकूलव्यापारो धात्वर्थः। पुष्प इत्ति शुष्कीभावानुकूलव्या
पाराभावो यः आतपनिष्ठस्तदनुकूले णादिः पूर्ववद्बोधः। अग्नेर्माणवकं वारयतीत्यादौ जन्यत्वं पंचम्यर्थः
दाहानुकूले णादिर्धात्वर्थः। नचैवमननुगमः। अनुभवानुरोधेन लक्षणायामननुगमस्यादोषत्वात्। यवे
भ्यो गां वारयति। अन्यथा भक्षयिष्यतीति कूपादंधं वारयति पतिष्यतीति पुष्पेभ्य आतपं वारयति शुष्का
णि भविष्यंतीति अग्नेर्माणवकं वारयति दग्धो भविष्यतीति प्रयोजनस्य भेदेन विवरणात्। अन्ये त्वनुगम
रसिकाः। सर्वत्र संयोगजनकव्यापाराभावस्य कर्मकारकवृत्तेरनुकूलो यो व्यापारः स एव धात्वर्थः। वृत्ति
त्वं च पंचम्यर्थः इत्याहुः। तन्न। यवेभ्यो गोसंयोगं वारयति यवेभ्यः कार्मणिकं वारयतीत्यादावननुगमानुप
पत्तेः। ननु वारणार्थानामीप्सित इति सूत्रेण तावदीप्सिते वारयति क्रियायोग एवापादानत्वनियमः। इष्ट

राम

दन्नादंशं ददातीत्यादौ तदभावेपि दर्शनात्। नापि वारणार्थयोगे ईप्सित एवेति नियमः। सर्पाद्वारयति पापाद्वारयति गंगास्नानाद्वारयतीत्यादौ अनीप्सितेपि दर्शनादिति चेत्। निवार्यनिवारकान्यतरस्येप्सित इति त
दर्थात्। सर्पादयो हि निवारकस्यानिष्टा अपि पुरोदृष्टत्वादिना निवार्यस्येष्टा एव। पुण्यस्य आतपं वा
रयतीत्यादौ निवार्यस्याचेतनत्वान्निवारकग्रहणं। अथवा धात्वर्थतावच्छेदकीभूतस्य विनाशाद्यनुकू
लव्यापाराभावरूपस्य फलस्य यत्फलं विनाशादि तत्संबंधित्वेन प्रसक्तस्य यवादेस्तद्विपरीतत्वेन नि
वारकेच्छाविषय इति तदर्थ इति न कश्चिद्विरोधः। वस्तुतस्तु वक्ष्यमाणानि सर्वाणि सूत्राणि भाष्यकारेणा
प्रत्याख्यातानि। तस्यायमाशयः। ध्रुवमपाय इति सूत्रे हि न वस्तुत एव क्रियाजन्यो विभागोभिप्रेतः अ
पि तु नाकिं कोपि। यदीयं क्रिया न स्यात्तदा कर्मकारकेणापादानस्य संबंधः स्यात् क्रियया तु सा निवारि

भा०र०
१०८

108

तद्धतितदभावो जनितइव। तदभिप्रायकमेव चापायपदं। आवश्यकं चैतादृशं व्याख्यानं असंयुक्ता देवचो
रास्मलायितइत्येतदर्थं। ततश्चतत्स्वत्रिलेवयवादेरपायादनत्वसिद्धेः। सूत्रांतरवैयर्थ्यमिति। नचैवं गवादे
रपिताद्दशाभावाश्रयत्वादपादानत्वापत्तिः। इष्टितमत्वादिप्रयुक्तकर्मसंज्ञया परत्वेनापादानसंज्ञाया
बाधात्। वैपरीत्येन विवक्षायामिष्टापत्तेश्च। नचाविवक्षायामुभयोरपादानत्वापत्तिः। वारयतेः सकर्मकत्वे
नान्यतरस्य कर्मत्वविवक्षाया आवश्यकत्वात्। एवं अंतर्धौ येनादर्शनमिच्छतीत्यनेन अंतर्द्धौ व्यवधाने सति
यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादानं स्यादित्यर्थकेन मातुर्निलीयते कृष्ण इत्यादौ पंचमी। अत्र
प्रसक्ताभावेच्छापूर्वकः प्रसक्तविरोधिव्यापारो धात्वर्थः। वृत्तित्वं पंचम्यर्थः। धात्वर्थतावच्छेदकप्रसक्तेर्न्वे
त्विविरोधित्वं तज्ज्ञानकर्मकं किंकसान्निकर्षाभावानुकूलत्वम्। कृतिराख्यातार्थः। तथा च मातृसन्निस्वविष

राम
१०८

यकप्रतत्ताभावेच्छापूर्वकोयः प्रयत्नजनकलौकिकसन्निकर्षाभावानुकूलव्यापारानुकूलकृतिः तस्यवृत्तिरि
तिबोधः। व्युत्पत्तिवलेनचप्रयत्नेहेतुत्वस्यविषयत्वस्यबोधः पार्ष्टिकः। एवं आख्यातोपयोगे नियमपूर्वकविद्यास्वी
कारेवक्ता अपादानसंज्ञः स्यादित्यर्थकेन आख्यातोपयोगइतिसूत्रेणोपाध्यायादधीतइत्यत्रपंचमी। अत्रो
२ च्चारणोत्तरकालीनमननस्यसोच्चारणधात्वर्थः। वृत्तित्वंपंचम्यर्थः। इदमपिसूत्रंभाष्यकारेणप्रत्याख्यातं। उ
च्चारणक्रियाजन्यशब्दजनकस्वमानजातीयशब्दानामुपाध्यायमुखनिसृतत्वेनोपाध्यायस्यक्रियाज
न्यविभागाश्रयत्वात्। ध्रुवमपायइतिसूत्रेणैवतत्सिद्धेः। नचैवंविधस्याविभागस्यमुख्यविभागत्वाभावा
न्नैकविधत्वमपादानत्वस्येतिवाच्यं। नानाविधानामेवंजातीयकानामपादानत्वानांव्यापकीभूताखंडो
पाधिरूपादानत्वमेवनात्पर्यात्। अतएवैवंविधाः सर्वेप्रयोगाः शक्याएवेत्यपिशक्यंवक्तुं। तद्ज्ञापनमेव

चप्रत्याख्यानफलं। उक्तविधमन्तद्रूपेणानिरूढलक्षणया वोधसिद्ध्यर्थं तत्तत्सूत्राणीति मत्वास्माभिरन्यैश्चत
न्मतस्त्राणि व्याख्यायन्ते। एवं जायमानस्य हेतुरुपादानसंज्ञः स्यादित्यर्थकेन जनिकर्त्तुः प्रकृतिरिति सूत्रेण ब्र
ह्मणः प्रजाः प्रजायन्ते इत्यत्र पंचमी। अत्र जनत्वं पञ्चम्यर्थः। स च स्वाश्रयवृत्त्युत्पत्तिकत्वसंबंधेनाख्यातार्थे
आश्रयत्वे ऽन्वेति। अत्र हेतुत्वमुपादाननिमित्तोभयसाधारणरूपेण विवक्षितम्। तेन पुत्रात्प्रमोदो जायते मृ
दो घटो जायते इत्यादौ पंचमी। ब्रह्मणस्तूभयरूपत्वात्पंचमी। एवं भुवः प्रभव इत्यनेन भवनस्य प्रकर्षविशि
ष्टस्य यः कर्त्ता तस्य यः प्रभवनप्रतियोगीति यावत् सोपादानसंज्ञः स्यादित्यर्थकेन हिमवतो गंगा प्रभवति
इत्यत्र पंचमी। अत्र प्रकर्षः संयोगध्वंसलक्षणाव्यवहितोत्तरक्षणवृत्तित्वं धात्वर्थश्चैतत्संसर्गीय भारतवर्षस्य
तत्संयोगध्वंससमानकालीनत्वादृशस्य संयोगः प्रतियोगित्वं पंचम्यर्थः। तस्य च प्रकर्षार्थसंयोगद्वारकत्वा

ख्यातार्थान्वयः। आख्यातार्थआश्रयत्वं धात्वुपसर्गार्थभूतसर्वसंयोगेष्वु गंगावृत्तित्वं चव्युत्पत्तिवललभ्यं तथा च हिमव
त्येति यौगिकगंगासंयोगध्वंसत्त्वेन व्यवहितोत्तरत्त्वेन वृत्त्येतत्समीपमात्रत्तवृत्तिस्य भूगंगासंयोगध्वंसासमा
नकालीनतादृशभूसंयोगाश्रयत्वं गंगावृत्तीति बोधः पर्यवसितः। अत्र वैकुंठभूयोगध्वंसत्त्वेनोत्तरं तादृशभूगंगा
संयोगस्याद्यस्य जायमानतया वैकुंठाद्गुविप्रभवति गंगेति प्रयोगापत्तिरतो व्यवहितेति। काशीगंगासंयोगध्वं
साव्यवहितोत्तरत्वेनोक्तविधभूगंगासंयोगानां केषांचित् जायमानत्वात् काशीतो गंगाभुविप्रभवतीति प्रयोगा
पत्तेस्तादृशसंयोगध्वंसासमानकालीनेति। एवं च आद्यस्यापि तादृशसंयोगस्य तदव्यवहितपूर्वक्षणवृत्ति
वैकुंठसंयोगध्वंसाव्यवहितोत्तरत्वाद्वैकुंठात्प्रभवतीति प्रयोगापत्तेरनिवारणात् प्रकर्षार्थभूतसंयोगे पा
द्यत्वविशेषणं देयं। वस्तुतस्तु वैकुंठाद्गुविप्रभवतीति प्रयोगस्येष्टापत्त्यैव परिहर्तुं शक्यत्वान्न तन्निवारणा

यपदद्वयद्दानं। एवं ल्यब्लोपे कर्मण्यधिकरणे चेत्यनेन अर्थाध्याहारादिनागम्यमानेल्यबंते कर्मणि अधिकरणेवा
पंचमीस्यादित्यर्थकेन प्रासादात्प्रेक्षते इत्यादौ पंचमी। प्रासादमारुह्य प्रेक्षते प्रासादे स्थित्वा प्रेक्षते इत्यर्थः। अत्र
कर्मत्व अधिकरणत्वं वा पंचम्यर्थः। तस्य च स्वनिरूपकारोहणादिभावनोत्तकोर्रत्वकत्वादिसंसर्गेण प्रेक्षणभा
वनायामन्वयः। नचगम्यमानक्रियाँ कथं संसर्गघटकत्वं। कस्मात्त्वं नद्याइत्यादौ आगतइतिपदाध्याहारेणग
म्यमानक्रियादेर्विभोक्त्याद्युपपत्तौ संसर्गघटकत्वस्य सुतरामुपपत्तेः। एवं यतश्चाध्वकालनिर्माणं तत्र पं
चमी तद्युक्तादध्वनः प्रथमासप्तम्यौ कालात्सप्तमीच वक्तव्येति वार्त्तिका द्वनात् ग्रामो योजनं योजनेवाका
र्त्तिक्या आग्रहायणीमासेइत्यादौ पंचमी। अत्रावधित्वं पंचम्यर्थः। वनावधिकयोजनपरिमितदेशवृत्तिर्ग्रा
मइति बोधः फलितः। प्रथमार्थोप्यधिकरणकत्वमेव। एवमन्यारादितरर्त्तेदिक्छब्दांचूत्तरपदाजाहियुक्तेइ

स्पनेनएभिःप्राद्यैर्योगे पंचमीस्पर्धकेनकृष्णाद्दन्यः इत्यादौपंचमी। प्रतियोगित्वं चात्र पंचम्यर्थः। तस्य च स्वनिरू-
पकान्योन्याभावद्वारकपरंपरया अध्याहृतार्थेऽन्वयः। अन्यइत्यर्थग्रहणमिति सूचनार्थं पृथगितरपदोपन्या-
सः। अतएवकृष्णाद्भिन्नः। कृष्णादितरः। कृष्णात्पृथक् इत्यादिद्रष्टव्यं। नचैवं घटं पटोन घटस्यान्योन्याभा-
वो घटस्य संयोगाभावो घटस्य तादात्म्याभाव इत्यादावपि पंचम्यापत्तिः। घटाद्विभागो घटाद्भेदः पटस्ये-
सादावविवधर्ममात्रवाचित्वेपि पंचम्यापत्ते दुर्वारत्वात्। धर्मिविवक्षायामपि घटस्यान्योन्याभाववानित्या-
दौतदापत्तेर्दुर्वारत्वाच्चेतिवाच्यं। पंचम्यर्थो हि प्रतियोगित्वं स्वनिरूपकभेदादिघटितसंसर्गेणास्मन्मते
आख्यातार्थान्वयी। तत्र चान्यादिपदं संसर्गग्राहकं तात्पर्यं। परमते तु तदुपस्थापितभेदादावेवान्वय इ-
तिविशेषः। तदिहान्यादिपदैर्भेदादेर्विशिष्यभेदत्वादिनोपस्थितत्वाद्युक्तो न योगे पंचमी। अन्योन्याभा-

भा०र०
११२

वादिवदेत्त्वतो न्यादिपदवाच्यतादात्म्यापन्नभावत्वेन वोधान्न तद्योगे पंचमी। नञो विलाघवेनाभावत्वेनैव वाचक-
तानभ्युपेतत्वादिना अनेकशक्तिकल्पनापत्तेः। अत एव तदन्यतद्भिन्नतदभावेषु नञ् इत्यनुशासनमपि नञ्वृ-
त्तिपरं अन्यत्वस्यालाभात्। [illegible] अतो विशेष्यवोधं समभिव्याहारविशेषादिनेति
न तत्रापि पंचमीप्रसक्तिः। अत एव घटाद्भेदवान् घटात्पृथक्त्ववत्त्वमित्यादिप्रयोगा निरपवाधाः। नचैवं
घटः पटो नेत्यादौ पंचम्यन्तापत्त्या वविभक्त्यापत्तिर्दुर्वारेति वाच्यं। नियतप्रयोगा हि केचिदव्यया इत्यनुशासनां-
तरेण तदनापत्तेः। नेयं विभाषा इत्यादिभाष्यप्रयोगस्तु। वनादाराद्ग्रामः। आरात्तस्मान्न किंचित्। अत्रापि प्र-
तियोगित्वं पंचम्यर्थः। यस्तु पुरुषाधानमन्त इति प्रयोगः। सत्रानेह्नितीयाचेति चाइस्त्रत्रादवगंतव्यः। दिशि
दृष्टः शब्दो दिक्शब्दः तेनात्र लक्षणयादेशकालयोर्वाचिना योगे पंचमी सर्वः। पूर्वो ग्रामाद्देशः चैत्रात्पूर्वः।

राम
११२

फाल्गुनइत्यादौ। अतएव अवयववाचिना योगेन। पूर्वं कायस्य। अंचूत्तरपदयोगेपि। प्राक्‌प्रत्यग्वा ग्रामात्। आचू
योगेपि। दक्षिणा ग्रामात्। आहियोगेपि। दक्षिणाहि ग्रामात्। एवं कार्त्तिक्याः प्रभृतीति भाष्यप्रयोगात् प्रभृत्यर्थ
योगेपि पंचमी। भवात्प्रभृति सेव्यो हरिः। एवमपपरिवहिरंचवः पंचम्या इति समासविधिसामर्थ्याद्बहि
र्योगेपि सा। ग्रामाद्बहिः। एवं पंचम्यपाङ्परिभिरिति सूत्रादेतैः कर्मप्रवचनीयसंज्ञैर्योगे पंचमी तदर्थकाद
पहरे संसारः। परिहरेः संसारः। आमुक्तेः संसार इत्यादौ पंचमी। अपपरी वर्जन इति सूत्रादनयोः कर्म
प्रवचनीयसंज्ञा। अतएव वर्जनार्थकपरियोग एव पंचमी। लक्षणाद्यर्थकयोगे द्वितीयेवेत्युक्तं। आङ्स्त
आङ् मर्यादावचन इत्यनेन कर्मप्रवचनीयसंज्ञा। वचनग्रहणादभिविधावपि। एवं प्रतिनिधिप्रतिदाने
च यस्मादिति सूत्रादेतदर्थककर्मप्रवचनीययोगे पंचमी तदर्थकात् पंचमी। सच प्रतिः प्रतिनिधिप्रतिदानयो

X दानजन्योपकारप्रत्युपकार इति यावत्। २।

भा०र०
११२
112

रिति सूत्रात् प्रतिरेव। प्रद्युम्नः कृष्णात् प्रति। कृष्णप्रतिनिधिरित्यर्थः। मुख्याभावे यस्तत्सदृशस्तदादीयते स प्र
तिनिधिः। प्रतियोगित्वं चात्र पंचम्यर्थः। प्रतिदानं दत्तस्य प्रतिनिर्यातनं। तिलेभ्यः प्रतियच्छति माषान्। अ
त्र कर्मत्वं पंचम्यर्थः। तस्य च निपातोपात्तदानभावनायामन्वयः। तथा च तिलकर्मकदानभावनाजन्योपका
रप्रत्युपकारजनकीभूता माषकर्मिका दानभावना चैत्रवृत्तिरिति शाब्दबोधः। एवं अकर्त्तर्यृणे पंचमीति
सूत्रात् कर्तृवर्जितं यदृणं हेतुभूतं ततः पंचमी स्यात्। कारणाद्बद्धः शताद्बद्धः इत्यादौ पंचमी। अत्र हेतुत्वं पं
चम्यर्थः। शतमिह उत्तमर्णाय धार्यमाणत्वादृणरूपमेव। तस्य कर्तृत्वे तु शतेन बंधितः इत्ये तृतीयैव।
अत्र हि णिजन्तत्वाद्धनप्रयोजके ऋणे हेतुत्ववत्तत्प्रयोजको हेतुश्चेति चकारेण कर्तृसंज्ञाया अधिकर
णात्कर्तृत्वावश्यकतया तृतीयान्तत्वमेव। एवं विभाषा गुणेऽस्त्रियां इति सूत्राद्गुणे हेतावस्त्रीलिंगे पंचमी वा

राम
११२

स्यादिसमर्थकाज्ज्ञाद्याज्ञाद्येन वा बद्ध इत्यत्र विकल्पेन पंचमी। गुणत्वाभावे स्त्रीलिंगे वा चनेन कलं बुध्या मुक्त
-इत्यादौ तृतीयैव। हेतावित्यनुवर्त्तते सूत्रात्। गुणत्वं चेह परतंत्रत्वमात्रं। तेन वह्निमान् धूमादित्यादौ पंच
मी। नास्तीह घटोऽनुपलब्धेरिति स्त्रीलिंगे तु पंचमी वा कृतलकं प्रकृतेस्तदनुदृष्टेरिति वार्त्तिकप्रयोगादनुसं
धेया। एवं पृथग्विनानाना योगेपि। अत्र प्रतियोगिता कलं सर्वविभक्त्यर्थः। तत्र द्वितीया संनिहितत्वादेवानु
वर्त्तते। पंचमी तु मंडूकप्लुत्यानुवर्त्तनीया। भाष्यकृता तथैव व्याख्यातत्वात्। एवं करणे स्तोकाल्पकृच्छ्रकतिप
यस्यासत्त्ववचनस्येति सूत्रादिभ्यः करणे तृतीया पंचम्यौ स्यातां इत्यर्थः। स्तोकेन स्तोकाद्वा मुक्त इत्यादौ
तृतीयया सह पंचमी। करणत्वं पंचम्यर्थः। द्रव्यरूपसत्त्ववचनत्वे तु स्तोकेन विषेण हत इत्यादौ तृतीयैव। ए
वं दूरांतिकार्थेभ्यो द्वितीया चेति सूत्रादेभ्यो द्वितीया चात् पंचमी तृतीये इत्यर्थः। ग्रामस्य दूरं दूराद्दूरेणेत्यादौ

भा०र०
२२३
113

द्वितीयातृतीयाभ्यांसहपंचमी। प्रातिपदिकमात्रार्थे विधिरयं। नत्वत्र विभक्त्यर्थोन्यः कश्चित्। इह सप्तम्यपि सप्त
म्यधिकरणे चेति सूत्रे चकारेण दूरांतिकार्थेभ्य इत्यनुकर्षणात्। तेन ग्रामस्य दूरेस्तीति प्रयोगो नानुपपन्नः। अ
त्रासत्ववचनत्वस्यानुवर्त्तनात् सत्ववचनत्वे नैतद्विभक्तिचतुष्टयनियमः। सत्ववचनत्वं चेह सामानाधिकर
ण्येन प्रातिपदिकार्थविशेषणत्वं। तेन दूरः पंथा इत्यादौ दूरशब्दस्य पथो विशेषणत्वेन द्विभक्त्यैव विभक्तिः।
यद्यपि चास्मन्मते विशेषणं नाम प्राख्याते नैवान्वयस्तथापि यत्र दूरत्वविशिष्टाभेदः संसर्गघटकस्तत्रप्र
थमा। यत्र तु दूरत्वाधारता संसर्गघटिका तत्र विभक्तिचतुष्टयमिति न कोपि विरोधः। तसिद्वं पंचम्यर्थः सर्व
त्र भावनान्वयीति। एवं षष्ठ्यर्थोपि तत्रैवान्वेति। सच षष्ठी शेष इति सूत्रानुशिष्टः। तथाहि उक्तादन्यः शेषः।
उक्तानि च सर्वं कर्मत्वादीनि। तद्भिन्नाश्च सजातीयत्वात् स्वस्वामिभावादयः संबंधास्तेषु षष्ठी स्यादिति सूत्रा

राम
११३

र्थः। तेषु च न प्रत्येकं शक्तिः। अनेकशक्तिकल्पनापत्तेः। अपि तु संबंधत्वेन संबंधत्वं च संबद्धाविति प्रतीतिसाक्षिको
धर्मविशेषः। एवं च शक्यतावच्छेदकस्य संबंधत्वस्य कर्तृत्वकर्मत्वादिष्वपि सत्त्वात्तेषामपि संबंधत्वेन रूपेण
षष्ठ्यर्थतास्त्येव। अत एव सतां गतं सर्पिषो जानीते मातुः स्मरति एधोदकस्योपस्कुरुते शंभोर्भजे चरणयो
ः फलानां तृप्त इत्यादयः प्रयोगाः। अत एवोक्तशक्यतावच्छेदकातिरिक्तशक्यतावच्छेदकावच्छिन्नसंबंधा ए
व षष्ठीपदार्थः। स च यथैव राज्ञः पुरुष इत्यादौ स्वस्वामिभावस्तथैव सतां गतमित्यादौ कर्तृत्वादिकमपि। संबं
धत्वं च सर्वत्र शक्यतावच्छेदकं। अत एव कर्तृत्वत्वादिना तद्बोधे लक्षणेति वक्ष्यते। न चैवं संबंधत्वेन रूपेण स
र्वसंबंधानां शक्यत्वे एकशते षष्ठ्यर्था इति महाभाष्यकारीयवचनानुपपत्तिः। पार्थशब्दस्यार्जुन इव प्रचु
रप्रयोगेणैव तत्संबंधग्रहणे संभवति अन्यसंबंधग्रहणस्याप्यावश्यकत्वमिति सूचनार्थत्वात्। तदिह राज्ञः

पुरुष इत्यत्र सेवकत्वं षष्ठ्यर्थः। तत्र निरूपकत्वसंसर्गेण राज्ञोन्वयः। आधेयत्वसंसर्गेण च तस्य पुरुषे
न्वयः। सर्पिषो जानीते इत्यत्र वक्ष्यमाणरीत्या संबंधित्वेन करणत्वं षष्ठ्यर्थः। तस्य धात्वर्थ इत्येवं तत्र तत्र योग्यता
द्यनुसारेण समभिव्याहृतमात्र एवान्वय इति नात्र कारकविभक्तिवत् क्रियान्वयनियम इति तार्किकाः। शा
ब्दिका मीमांसकाश्च। वस्तुतस्तु योग्यताद्यनुसारेण साक्षात्परंपरासाधारणेन षष्ठ्यर्थस्यापि क्रियाया
मेवान्वयः। सुवर्णप्रकारकशाब्दत्वावच्छिन्नं प्रतिभावनाविशेष्यतासंबंधेन लिंगानन्वयि पदजन्योपस्थितिः।
कारणमित्येवमेकेनैव कार्यकारणभावेनान्वयोपपत्तेः। इतरथा षष्ठीभिन्नसुवर्णस्थले न्यायानुसन्धिः
षष्ठीस्थले चान्येति व्युत्पत्तिद्वयकल्पनापत्तेः। इष्यते च परैरपि स्थाल्यां तंडुलं पचति गृहे चैत्रः पचती स्था
ल्यां सम्पन्नस्यार्थस्य तंडुले चैत्रप्रकारकः क्रियान्वयो न तु तंडुलादावेव। तत्र च राज्ञः षष्ठ्यर्थे तस्य च पुरुषप्रकार

कोस्त्वादिक्रियायामित्येव युक्तं उत्पश्यामः। एवं करणत्वादिकमपि यत्र संबंधत्वेन षष्ठ्यर्थस्तत्र धात्वर्थद्वारकः
अत एव तत्प्रतिपादकं ज्ञोविदर्थस्य करण इति सूत्रं। अत्र भाष्यव्याख्यानाच्छेष इत्यनुवर्त्तते। तेन ज्ञानभिन्नार्थ
कस्य जानातेर्धातोः करणे शेषत्वेन विवक्षिते षष्ठी स्यादिति सूत्रार्थः। सर्पिषो जानीते। सर्पिषो ज्ञानं। अत्र
लक्षणया ज्ञानपूर्विका प्रवृत्तिर्धात्वर्थः। तस्यां यत्र सर्पिषः करणत्वमेव शेषत्वेन विवक्षितं तत्र सर्पिष इ
ति षष्ठी। करणत्वत्वेन करणत्वविवक्षायां तृतीयैव। ज्ञानार्थके तु विषयित्वार्थिका द्वितीया। तस्य संबंध
त्वेन बोधे तु षष्ठ्येवानचैवं शेषे षष्ठीसमनेनैव सिद्धेः पृथक् सूत्रवैयर्थ्यं। षष्ठी पुनर्विधिः षष्ठ्येवन तु लुक
द्रसेवं पुरः। तेन न तथा पूः समासो निवर्त्तते। तत्र संबंधत्वेन उक्त धात्वर्थकरणत्वविवक्षायां न षष्ठी समा
सः। एवमुत्तरेष्वपि सप्तसु सूत्रेषु षष्ठी पुनर्विधिर्मा तु स्मरणमित्यादौ शेषषष्ठी समास निषेधार्थ एव।

भा०१०
१२५

115

तत्र हि अधीगर्थदयेशां कर्मणीति सूत्रादे[षां] कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यादित्यर्थकान् मातुरध्येति
मातुः स्मरति। मातुः स्मरणं। सर्पिषो दयते। सर्पिषो दयनं। जगतामीष्टे। जगतामीशनमित्यादौ षष्ठी विहिता।
अधीगर्थाः स्मृत्यर्थाः। अत्र शेषत्वादेव षष्ठी प्राप्तौ पुनः षष्ठीविधिः षष्ठीसमासप्रतिषेधार्थः। नचैवं ह
रिस्मरणमिति प्रयोगानुपपत्तिः। तस्य कृद्योगे कर्मत्वेन कर्मत्वबोधकषष्ठीसमासत्वेनोपपत्तेः। तत्फ
लं च कारकपूर्वकत्वात् कृदुत्तरपदप्रकृतिस्वरः रकारोत्तराकांशे षष्ठीसमासत्वे अन्तोदात्तत्वापत्तेः। त
था च स्वरार्थं यमत्र सूत्रे फलितं। किंच यत्र मातुः स्मृतमित्यादौ न लोकाव्ययेत्यनेन कर्मषष्ठी प्रतिषि
द्धा तत्र शेषषष्ठ्या समासप्रसक्तौ तन्निषेधार्थं षष्ठीपुनर्विधिः। एवं कृञः प्रतियत्ने इति सूत्राद्गुणा
धाने विद्यमानस्य करोतेः कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यादित्यर्थकादेधोदकस्योपस्कुरुते। एधो

ति
॥

राम
११५

नस्पोदोतः। ८

दकस्योपस्करणं इत्यत्र षष्ठी। प्रयोजनं पूर्ववत्। एवं रुजार्थानां भाववचनानामज्वरेरिति सूत्राद्रुजा व्याधिस्तद
र्थानां भाव एवं यत्र कर्त्तारि तेषां ज्वरिवर्जितानां कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यात् इत्यर्थकात्। चोरस्य
रुजति रोगः। चोरस्य रोगस्य रुजा इत्यादौ चौरे षष्ठी। अत्र रोगाख्यव्याधेरेव व्याध्यंतरं प्रति कर्तृत्वात् भावक
र्तृकत्वं। तस्य कर्मणि चौरे संबंधित्वेन विवक्षिते कर्मत्वे षष्ठी। कर्मत्वेन विवक्षिते तु पिरंते द्वितीयेव। रुदं
ते तु षष्ठी समासोपि। संबंधत्वेन विवक्षायां न षष्ठी समास इत्यादि पूर्ववत्। अत्राज्वरिसंताप्योरिति वाच्य
मिति वार्त्तिका। रोगस्य चौरज्वरः चौरसंताप इत्यादौ समासो भवत्येव। भावकर्तृकत्व ग्रहणात् नद्याः कूलं
रुजा नदी कूलं रुजति इत्यादिप्रयोगाः। एवमाशिषि नाथ इति सूत्रादाशीरर्थस्य नाथतेः कर्मणि शेषत्वेन
विवक्षिते षष्ठी स्यात् इत्यर्थकात् सर्पिषो नाथते सर्पिषो नाथनं इत्यादौ षष्ठी। सर्पिस्तु बहुलं भूयादित्या

रु

मा०२०
११६
116

शास्त्रइत्यर्थः। आशीरर्थकत्वाभावेतु माणवकनाथनमिति समासः। एवंजासिनिप्रहणनाटक्राथपिषां
हिंसायामिति सूत्रा(द्) हिंसार्थानामेषांकर्मणि शेषत्वेन विवक्षिते षष्ठी स्यादित्यर्थकात् षष्ठी। चोरस्यो
ज्जासनं। निप्राभ्यां उपसर्गाभ्यां समस्ताभ्यां व्यस्ताभ्यां वा युक्तो हनो निप्रहणः। चोरस्य निप्रहननं प्रणि
हननं निहननं प्रहननं वा। चोरस्योन्नाटनं। चोरस्य क्राथनं चोरस्य पेषणं। हिंसार्थकत्वाभावेतु धाना
पेषणमिति समासः पूर्ववत्। एवं व्यवहृपणोः समर्थयोरिति सूत्राद् एकार्थयोरनयोः कर्मणि शेषत्वेन
विवक्षिते षष्ठी स्यादित्यर्थकात् शतस्य व्यवहरणं शतस्य पणनं इत्यादौ षष्ठी। अत्र हि व्यवहृधातोः
पणनापरपर्यायं द्यूतमप्यर्थः। पणधातोश्च क्रयविक्रयरूपव्यवहारोपि। अतो द्वयोस्तुल्यार्थकत्वं। अ
र्थान्तरत्वेतु षष्ठीविध्यभावान्न समासप्रतिषेधः। शलाकाव्यवहारो गणनेत्यर्थः। ब्राह्मणपणनं स्तुतिरि

राम
११६

सर्थः। एवं कृत्वोर्थप्रयोगेकाले अधिकरणे इति सूत्रात् कृत्वोर्थानां शब्दानां प्रयोगे कालवाचिन्यधिकरणे शेषत्वे
नविवक्षिते षष्ठी स्यादित्यर्थकात्पंच कृत्वोह्ने भुंक्ते पंच कृत्वोह्नो भोजनं द्विरह्नो भोजनं इत्यत्र षष्ठी। अत्र षष्ठीसू
त्राविच्छिन्नमविशेषणग्रहणं व्याख्यानतो मंडूकप्लुत्यानुवर्त्तते। अधिकरणत्वत्वेन विवक्षायां तु द्विरहनि भुंक्त
इति सप्तम्येवा तक्ति इममिय मष्ट सूत्री शेषत्वविवक्षायां समासप्रतिषेधार्थेति। यानि तु षष्ठी हेतुप्रयोग इ
त्याद्यनुशासनानि तानि लाक्षणिकानुशासनानि। तथाहि। षष्ठी हेतुप्रयोग इति सूत्रात् हेतुशब्दप्रयोगे हेतुत्वे
न हेतौ वोध्ये षष्ठी स्यादित्यर्थकादन्नस्य हेतोः वसति इत्यत्र षष्ठी। अत्र हेतुत्वेन हेतुत्वं लक्षणया षष्ठ्यर्थः। तत्र
पूर्वनिरुक्तं हेतुशब्दप्रयोगस्तात्पर्यग्राहकः। तदुत्तरषष्ठ्याः सामानाधिकरण्यप्रसिद्ध्यर्थं सएवार्थः। अन्नहेतुक
वासाश्रयत्वमित्यादिशाब्दबोधः। अत्र हेतुप्रयोगाभावे तत्वेन हेतुत्वविवक्षायां पूर्वोक्तविधया तृतीयेवा। शेष

भा०र०
११७
117

त्वेनहेतुत्वविवक्षायांतुहेतुशब्दप्रयोगाभावेपिशक्यैवषष्ठ्यंतःप्रयोगः।सर्वनाम्नोस्यहेतुशब्दप्रयोगेहेतुत्वेनहेतुत्व
विवक्षायांषष्ठीवैकल्पिकीसर्वनाम्नस्तृतीयाचेतिसूत्रात्।केनहेतुनावसतिकस्यहेतोर्वसति।तृतीयेमुपलक्षणं
निमित्तकारणहेतुषुसर्वासांप्रायदर्शनमितिवार्त्तिकात्।तेनकोहेतुर्वसतिचैत्रकंहेतुर्वसति।कस्मैहेतवेवस
तिकस्माद्धेतोर्वसतिकस्मिन्हेतौवसतीत्यादयोपिप्रयोगाःसाधवः।अत्रसर्वहेतुत्वमेवविभक्त्यर्थोनुशास
नबलात्।हेकीदृशहेतुकंवासाश्रयत्वमित्यादिरेवचशाब्दबोधः।वसतिचैत्रःइत्यत्रकोहेतुःकंहेतुंउररीकृत
वसतीत्यादियोग्यपदांतराध्याहारेणव्याख्यानेतुविभक्तीनांतत्तदर्थकत्वमेवेतिध्येयं।एवंकिंनिमित्तंवसति।
केननिमित्तेनवसति।कस्मैनिमित्तायेत्यादि।किंकारणंवसति।केनकारणेनेत्यादि।निमित्तादिशब्दानामेकार्थक
त्वेपिद्वयमुपादानंउपलक्षणार्थं।तेनप्रयोजनादिपदप्रयोगेपिसर्वाविभक्तयोभवंति।असर्वनाम्नोपिहेत्वादि

त्व
राम
११७

शब्दप्रयोगेपि सर्वो विभक्तयो भवंति। अत्राद्वेतोर्वसति अत्रेन कारणेन वसति। वृत्तिकारेण सर्वनाम्नस्तृतीया चे
ति सूत्रे परिगणितस्याप्यस्य वार्तिकस्य हेतावित्ति सूत्रे भाष्यकारेणापाठात् शेषग्रहणं। असर्वनाम्नि प्रथमाद्वितीयेन स्त
इत्येतदर्थं। तेन अन्नं कारणं वसतीत्यपप्रयोगः। एवं षष्ठ्यतसर्थप्रत्ययेनेति सूत्रात् अतसर्थप्रत्ययोतसुच् प्रत्ययपा
दिर्दक्षिणोत्तराभ्यामतसुचिदिति सूत्रेण विहितस्तेन योगे षष्ठीत्यर्थकः। तग्रामस्य दक्षिणा। तो ग्रामस्योत्तरतो ग्राम
स्योपरिष्टादित्यादौ षष्ठी। अत्र प्रतियोगित्वं षष्ठ्यर्थः। तत्वे न वोधार्थं पृथगनुशासनं। न तु पंचम्यपवादार्थे वि
ध्याद्दक्षिणतः इत्यादिप्रयोगस्येष्टत्वात्। अत एव ततः पश्चात्स्रंस्यते इत्यादिभाष्यप्रयोगः सामान्येन ज्ञापक इति
चेत्। तन्न। प्रकृतापायात् पंचम्या द्वितीयाषष्ठ्यौ वाधके भविष्यत इति पृथग्विनेति सूत्रस्य भाष्यविरोधात्। अपंचम्य
पवादार्थमप्येतदनुशासनं। विंध्यादित्यादिप्रयोगस्त्वपप्रयोग सकंच षष्ठ्या योगमात्र विशेषं। तस्येव चाचात

भा०१०
११८

118

सुवुप्रत्ययस्यनिमित्तितानतुलुग्रहणतोग्राकूग्रामाद्दित्यादौप्रत्ययलोपेपभावस्यभाष्यकेप्यरसिद्धत्वात्।एवमे
नपाद्वितीयेतिसूत्रादेनवंतेनयोगेद्वितीयायोगविभावात्षष्ठीचेत्यर्थकाद्दक्षिणोनग्रामंग्रामस्यवेत्यत्रषष्ठी।
प्रतियोगित्वंविभक्तिरूपार्थः।पंचम्यपवादःपूर्वलिखितभाष्यात्।अत्तएवतत्रागारधनपतिगृहात्उत्तरेण
स्यादीपंमित्यादिरपप्रयोगः।हरदत्तोप्येवं।हरांतिकार्थैषष्ठ्यन्यतरस्यामितिसूत्रादेतैर्योगेषष्ठीवास्यात्पं
चमीवेत्यर्थकादूरंअंतिकंवाग्रामस्यग्रामाद्वेत्यत्रपंचम्यासहवैकल्पिकाषष्ठी।अत्रप्रतियोगित्वमेवतदर्थः
।एवंद्विपस्तदर्थस्येतिवाव्यवहृपणोःसमर्थयोरितिपूर्वसूत्रोक्तमतामशिःतद्धवद्वलेनघृतार्थस्यक्रयविक्र
यरूपव्यवहारार्थस्यचदिवःकर्मणिकर्मत्वेनविवक्षितेषष्ठीस्यादित्यर्थकाछतस्यदीव्यतिइत्यादौषष्ठी।स्तु
त्यादिरूपार्थांतरपरत्वेतुब्राह्मणांदीव्यतीतिद्वितीयैव।अत्रनशेषत्वेनविवक्षाअन्यथादिवेःपूर्वसूत्रेण

११८

वपारापत्तोरथक्स्त्वारंभवेप्यर्थ्यात्।द्विवेरूपसर्गेतुविकल्पेन षष्ठी॥विभाषोपसर्जेनइतिसूत्रात् शातस्य
शातस्यशातंप्रदीव्यति।इदंचनोकेत्रास्मरणेतुहीति।याज्ञास्मरणाइतिसूत्रात्छंद सिउपसर्गयोगाभावेपिहीती।ये
वाग्मामस्यतदह:सभायांदीव्येयुरित्यादौ।।एवंप्रेष्यब्रुवोर्हविषोदेवतासंप्रदानेइतिसूत्राद्देवतासंप्रदानकेर्थे
वर्तमानयो:प्रेषब्रुवो:कर्मणोहविर्विशेषस्यवाचकात् षष्ठीत्यर्थेकादग्नयेछागस्यहविषोनुब्रूहीप्रेष्यवाइ
त्यत्रकर्मत्वेषष्ठी।अत्रशेषग्रहणांनसंवंध्यतेप्रेष्येतिलोडंतेनसमासस्याप्रसक्तत्वेनतन्निषेधार्थत्वानु
पपत्ते:।हविष:प्रस्थितत्वेनविशेषणेप्रतिषेधोवक्तव्यइतिवार्तिकान्नुप्रस्थितत्वेनविशेषणेहीतीपेवान
अतएवइन्द्राग्निभ्यांछागस्यहविपोमेदस्त्रस्थितंप्रेष्येतिप्रयोग:।इदंचलोकवेदसाधारणं।छंदस्त्रत्रहंदोप
हणात्।यत्तुचतुर्थ्यर्थेवहुलंछंदसीत्यनुशासनादार्वोघाटस्तेवनस्पतीनामित्यादौवनस्पतिभ्यइत्यर्थेषष्ठी

भा० र० ११९

विधायकं नघस्य पवचनादेवमिद्धेः प्रत्याख्यातं। एवं कर्त्तोपजेदिति सूत्रमपि छंदसि वद्गल्लमित्यनुवृत्त्या वृत्ते
स्यवृत्ते नपजेत्यादौ षष्ठी विधायकं प्रत्याख्यातं कर्तृकर्मणोः कृती तिसूत्रात् कृद्योगे कर्मणि कर्त्तरि च षष्ठी
स्यादित्यर्थवात्। कृत्स्य स्यकृतिर्तु गतः कर्तोकृत्स इत्यादौ षष्ठी अत्र कर्तृत्वत्वेन कर्तृत्वत्वं कर्मत्वं कर्मत्वंत्वे
नकर्मत्वं च तु न्दसरायायाषष्ठ्यर्थेः। ननु शेषत्वेन व्याख्यानवशेन शेषइत्यस्य निवृत्तिप्रतीतेः। अत्रोभपत्र क
र्त्तृत्वं कर्मत्वयोः कृदुयात्तकृतावेवान्वयः। ओदनस्य पक्तेत्यादिवत्। ननु धात्वर्थे प्रधानक्रियायां वा। एतद्वानु
पदमेव स्फुटीकरिष्यते। धातुसुसाधुत्वार्थः। ओदनस्य पाकइत्यादौ धात्वर्थस्य कृदर्थकृतावेवान्वय
इस्यपि वक्ष्यते। नत्वेवमपि सूत्रे कृत्स्य यत्कृतावेष्यर्थ्ये। नलोकाव्ययेति वस्यमाणसूत्रेण लादेशरूपतिङादि
योगे षष्ठी निषेधेन परिशेषादेव कृद्योगे षष्ठी विधिप्राप्तेरिति वाच्यं। कृत्तपूर्वी कटमित्यादौ तद्धितयोगे षष्ठी।

119

११९

व्यावृत्त्यर्थेन तदुपपत्तेः। अत्र कृतपूर्वकठोपेने निकृत्तपूर्वा देवदत्तः। सपूर्वोच्चेति सूत्रेणासोपपदात् न पूर्वेशब्दात्
कर्त्रर्थे इनिप्रत्ययविधानात् अतः तत्र षष्ठीव्यावृत्त्यर्थं कृतग्रहणमर्थवत् नन्वेवं न तत्र द्वितीयापि निष्ठाप्रत्य
येनोपि वकर्मकारकस्याभिहितत्वेन स्याप्रसक्तेः। अत एवानभिहितविधिविहितषष्ठ्या अपि नत्राप्रसक्तत्वे
न तद्व्यावृत्त्यर्थं कृतग्रहणं वैयर्थ्याच्च। किंच कृदिदंस्यकटादिरूपविशेषणत्वेन पूर्वशब्देन सह तेन समासानु
पपत्तेः। सविशेषणानां वृत्तिर्नेष्यत इति निषेधादिति चेत्। अत्र वैयाकरणा नव्याः। पूर्वेकृतशब्दः कर्म
विशेषरूपकटान्वयमप्रतिपद्यमान एव कर्मसामान्यवाचकक्तप्रत्ययान्तं न पावा व्युत्पादितः पूर्वपदेन स
मस्यत इति न तावत् समासानुपपत्तिः। पश्चात्कटं कृतवानितिवत्। कटं कृतपूर्वात्पत्रापि द्वितीयान्तस्य कृद
र्थेन्वयः। क्तप्रत्ययेन च तस्यानभिधानाद् द्वितीयोपपत्तिरिति। तत्रान्तथा त्वेषान पदस्यापि त्रिरूपदानये स

पुरुषपदेन समासे कृते पश्चादेव तस्मिन् आद्यपदान्वयापत्तेः। कृत्प्रत्ययस्य कर्मसामान्याभिधसमावेशात्तदानभि
चान्यद्द्वितीयोपपादने ओदनः पच्यतेतरां गुरुर्धीः। दैत्री किं पतेतरां त्वपेत्यादावपि द्वितीयान्तत्वापत्तेश्चाक्त
प्रत्ययस्य भावार्थकत्वे कृतोऽवेवन्दित कर्मतया पश्चादपि कर्मान्वयानुपपत्तेश्च। इतरथा ओदनं पच्यतइ
ति भावाख्याते द्वितीयापत्तेः। अत एव दिशा ओदनं पाचकतम ओदनं गृहमित्यादिप्रयोगाणामप्याप
त्तेः स्वविशेषणत्वेन षष्ठ्यन्तप्रयोगस्याप्युपपत्तेश्च। अतः कटमिसस्य न कथमपि धात्वर्थान्वयः संभ
वी। एतेन कारकाणां धात्वर्थान्वयवादिनो नैय्यायिका अपि परास्ताः। अतोत्रैवं समाधेयं न कठस्पक्क
त्वर्थेन्वयो धात्वर्थान्वयस्य कारकाणामव्युत्पन्नत्वात्। नापि कृदर्थे प्रत्यर्थे भान्तत्वापत्तेः। असमर्थसमा
एपत्तेश्च। अपि तु तद्धितार्थ एव। कतत्वं हि अत्र तद्धितार्थः। अत एव पाचकादिकृत्सु च विशेषणत्वेन स्वा

॥ तत्रोदरणावालक्षणापाकृतिरेवतद्धितार्थः।तस्यांचलिंगानन्वयिन्यांविशेष्यवाचकपदोपस्थाप्यायांचान्वयः
व्युत्पत्त्यंतराभावेनगौरवाभावात्।तद्वाचकपदेकर्मकारकस्यानुक्तत्वेनप्रथमाप्रसक्तेः।विशेष्यवाचकप
दोपस्थाप्यायामन्वयाद्वौदनस्यपाचकइतिवत्समासभंगः।यत्रतुओदनःपच्यतेतरामित्यादौतद्धितेनाति
शयमात्राभिधानात्प्रकृतेरभिधानंतत्रलकारार्थकृतावेवकारकान्वयात्तेनकर्मत्वस्योक्तत्वेनद्वितीयापत्तिः
।पचतिकल्पमित्यादिवद्वतरामित्यस्य तात्पर्यग्राहकत्वांगीकारात्पचिधातुनैवविशिष्टपाठः।नुपक्षणात्त
रामित्यस्यनिरर्थकत्वेनविशेषणसापेक्षस्यापितेनहत्त्युपपत्तेः।अस्माकंगुरुकुलमित्यादिवद्वानित्यसा
पेक्षत्वात्तदुपपत्तिः।एवंओदनस्यपाचकतमइत्या।द्यपिद्रष्टव्यं।कृतपूर्वीकटमित्यादौतुकर्तृत्वस्येनिप्रत्य
येनोक्तेस्तदुक्तकृतौकटमित्यस्यान्वयाद्वितीयोपपत्तिः।एवंकरणांप्र[illegible]इत्यत्रापितपितेनस्वार्थविहितेन

मा०२०
१२१

कृदर्थकृतेरपि उपादानेन तत्रान्वयोपपत्तेः। अत एवोक्तं हरिणा ततः क्रियावता कर्त्रा योगो भवति कर्म
णां। अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः। क्रियासंबंध्यते तद्वत् कृतपूर्वादिकस्थिते ति। अवि
ग्रहा विशेष्यत्वेनानुपस्थिता अर्थे इत्यर्थः। गत्यादिस्यागतमिति कृत्यदस्या। धात्वर्थान्वयमादाय तत्र श
ब्दबोधोपपादने वैयाकरणनव्यानामसंगतमेव। कारकाणां धात्वर्थान्वयस्य क्वाप्यव्युत्पन्नत्वात्। न
न्वेवं ओदनस्य पाकः कृष्णकृतिरित्यत्र धकारकान्वयः। न नावसाके धात्वर्थे तस्मिन् तत्त्वाव्युत्पन्न
त्वात्। नापि वृत्त्यर्थेन स्पत्तिंगान्वयित्वात्। लिंगान्वयिन्यामप्यन्वयेव स्तुपदाभिधेयानामन्वयापत्तेरि
ति चेत्। पक्के त्यादिवत्तत्रापि कारकान्वयार्थं वृत्तेवे कृति विशिष्टपाकस्यत्वात्तं त्र्येण शक्तिलक्षणाभ्यां कृ
तिपाकयोरभिधानेन कृतौ कारकान्वयोपपत्तेः पाकानुकूलकृतिसाध्यः पाक इति च शाब्दबोधः। के

१२१

121

चित्तु नव्वभाहृतेरन्वयं लक्षणान योगेन षष्ठी कारके लक्षणाउपरा अपितु षष्ठ्येव तस्या अपि अध्याहृता
स्मिरूपप्रधानक्रियायामन्वयः परं परासंबंधेनेति न कश्चिद्दोषः। एवं च कृत्स्यस्य कृतिरित्यत्राध्याहृतं ता
पि वाच्यं जस्यान चैवं कृद्योगनिमित्तषष्ठी विधिवैयर्थ्यं तस्य तृजादिकृद्विषयत्वेनाप्युपपत्तेरि
त्याहुः। अतः सिद्धं कृद्योग एव कर्त्तृकर्मणोः षष्ठी न तु तदर्थकतद्धितयोगे कारकवाचिनयोगे वेत्ये
तदर्थं कृत्यग्रहणमिति। अत एव कृतपूर्वीत्यत्र वित्यसापेक्षत्वात् क्तप्रत्ययार्थेनान्वयासंगी कृत्यल
त्तप्वाकरइमस्याप्यापत्तिः परास्ता। उक्ततद्धितायोगे कारकाणां कृत्तावन्वयइत्येव ज्ञापनप्रयोजन
कत्वात् कृत्यग्रहणस्य। अतः सिद्धं तादृशतद्धितासमभिव्याहृतकृद्योगे एव षष्ठी न तु ताहृश तद्धित
योगेपि इति। कर्तृत्वं च स्वतंत्रकर्तृत्वं प्रयोजककर्तृत्वं चत्युभयं विवक्षितं तेन राज्ञो याजकः चैत्रस्य

भा०१०
१२२
122

पचनी स्थाल्ली एयाल्लीत्यादावुभयपत्र षष्ठी द्विकर्मकेतु मुख्यकर्मणि षष्ठी द्विकर्मकेतु मुख्यकर्मणि षष्ठ्यौ
निपत्ता द्वितीये गुणभूते तु अनिपता। अत एव नेता अश्वस्य ग्रामं स्या मस्य। वेत्तुभयथापि प्रयोगः इत्य
न्यत्र विस्तरः। अपंचषष्ठीविधिरनित्यः। नदर्हमिति निर्देशात्। अत एव धर्मेण मोदमुत्तमं मितिमद्दि
तिकेचित्। एवं उभयप्राप्तौ कर्मणीति सूत्रादस्मिन् कृतिरूभयोः प्राप्तिस्तद्योगे कर्मण्येव षष्ठी स्यात् क
र्तरि तु तन्नापि वेत्यर्थकात्। आश्चर्यो गवां दोहो गोपेनेत्यादौ कर्तरि न षष्ठी अत्र दोह इत्ययं भावे कृत्। स
च सकर्मकाकर्मकधातुसाधारणोऽतु लकारनिष्ठादिवदकर्मकधातुपरत्वेऽ तिनत्रोभयप्राप्तिः। अतस्त
त्रफर्वोक्तप्रपमप्रकारे सोवकृतिर्वोधोनुसंधेयः। शेषषष्ठीप्रकारस्तु [illegible] कृष्णस्य कृतिरित्यादावि
वेतिध्येयं। नापवाधमंते धात्वर्थेनैव कर्मोद्यत्वयः। न चैवं चात्यंतरकल्पना। भियासर्वत्रैवतदापत्तिः।

न

क
१२२

कृतपूर्वी करमित्यादौ तदन्वयस्योपपादितत्वात्। न चैवं व्युत्पत्त्यंतरकल्पनासु घर्थे धात्वर्थाद्यनेकसाधारणे
ऽनेन लिंगानन्वयिभावनाविशेष्यतासंबंधेन पदत्तन्योपस्थितेर्हेतुत्वमित्येकपेव तत्सिद्धेः तत्पदं च यथाख्यातकृ
न्निपाततद्धितादि तथा घञंते धातुरपीति युक्तस्तस्यामपि तत्र घञ्कर्माद्यन्वयः। अत्र हि भावनां परं फलप्रयोज
कीभूतकभिन्नव्यापारपरं नातो लडाद्यर्थे लिङाद्यर्थे वा विशेष्यत्वावृत्तिः। स चाख्यातादौ कृत्यादिरूपाभावना
घञादौ तु धात्वर्थस्य कारकत्वे तु उभयोः फलप्रयोजकत्वात्तत्कारकभिन्ने तु पादानाद्यत्र घञंत भिन्ने आख्या
तादौ धात्वर्थस्य कारकत्वेन विवरणासिद्धं तत्र धात्वर्थे कारकान्वयनिवारणांत्त्रानन्वये पचत्योदनमित्यस्य
पाकेनौदनं करोतीति विवरणोद्धितापांतो दनपदस्य करोत्यर्थान्वय एव बीजं। करोत्यर्थस्य आख्यातार्थत्वस्य स्यापित
त्वात्। तत्रापि धात्वर्थान्वये ओदनं पचतीत्यस्योदनस्य पाकं करोतीत्येव नियमेन विवरणापत्तिः। घञंतस्य फले च

धात्वर्थस्याकारकत्वात्तल्लिंगानन्वयात तत्वप्यपि ब्रन्नाद्यभिहितस्य तस्योभयतत्पत्वे धात्वभिहितेतस्मिन् कारका
न्वयोऽविरुद्धः। धातुप्रत्ययाभ्यां पाकाभिन्नः पाकइतिबोधः। अतश्चानुभवानुरोधेनैकपा वस्तुसत्यानत्र त
त्र आख्याताघर्थे धात्वर्थे वासत्वस्य याकारकान्वयोपपत्तेराश्चर्यो गवां दोहोगोपेनेत्यत्रापि धात्वर्थे कारका
न्वयो निराबाधः। वस्तुतस्तु लिंगान्वयित्वं न कारणतावच्छेदकं कोटिप्रविष्टं अपितु प्रत्ययवृत्त्योपस्थितित्वं अत
श्चघञर्थकृतावेवान्वयवत्सु पदाभिधेयायां चान्वयः कारकाणामिति न कोपि विरोधः। अयं चोभयप्राप्तौ कती
रि निषेधोऽकप्रत्ययअकचप्रत्ययस्त्रीप्रत्यययोर्योगेन भवति। अककारयोर्भयोगे प्रतिषेधो नेनिव
क्तव्यमिति वचनात् भेदिकाभित्सा वा रुद्रस्य जगतः भेदिका भेदनं भावे। अकेविभिन्नेत्यपि भावे अकारः। पा
तु सुठ या सुठो वाधानेति काशिकातस्यां सुठेति करणत्वे ल्नी पाउक्तवि घप्रत्ययभिन्नेकृ निनुडभयप्राप्तो विक
ल्पः कर्तरि शेषेविभाषेति वचनात् शोभना

व्याकरणस्य कृतिः पाणिनेः पाणिनिना वा। स्त्रीप्रत्ययविषयमेवेदं। केचिदविशेषेण विकल्पमिच्छंति। शब्दानामनुशा
सनमाचार्यस्य आचार्येण वा। तन्मते आश्चर्यो गवां दोहोऽगोपेन गोपस्येत्यपि भवतीति ध्येयं। एवं क्तस्य च वर्त्तमान
इति सूत्रात् वर्त्तमानार्थकक्तस्य योगे षष्ठी स्यादिसर्थकाद्राज्ञां मतो बुद्धः पूजितो वेत्यत्र षष्ठी। अत्र मतिबुद्धिपूजा
र्थेभ्यश्चेत्यनेन वर्त्तमाने क्तः। तद्योगाद्राज्ञामिति कर्त्तरि षष्ठी। कर्मणः क्तप्रत्ययेनाभिहितत्वात्। राज्ञां मतमित्येवं न
पुंसके भावेऽपि चानेनैव सूत्रेण षष्ठी। न च कर्तृकर्मणोः कृतीत्यनेन गतार्थत्वं। न लोकाव्ययनिष्ठेति वक्ष्यमाणवचने
न निष्ठाविषये पर्युदस्तायाः निष्ठाविशेषे प्रतिप्रसवार्थत्वात्। न चैवं पूजितो यः सुरासुरैरिति तृतीयानापत्तिः॥
तत्र त्यक्तप्रत्ययस्य भूतार्थत्वेनोपपत्तेः। नहि मतिबुद्धिपूजार्थेभ्यो वर्त्तमान एव क्तः। अतीतेऽपि धात्वर्थे उक्तधातू
नां क्तांतानां लोके प्रयोगदर्शनेन तद्वचनस्य भूतार्थकत्वबाधकत्वायोगात्। न चैवं वर्त्तमानार्थक मत्यादिधातूत्त

रक्तप्रत्ययभिन्नक्तप्रत्यये योगे छात्रस्य हसितमित्यादौ षष्ठ्या नापत्तिः। तस्याः शेषषष्ठीत्वेनोपपत्तेः। अतएव कर्तृत्व
त्वेन कर्तृत्वविवक्षायां तृतीये वा भूतार्थकक्तप्रत्ययस्याप्यधिकरणवाचित्वे पूर्ववत्षष्ठी प्रतिप्रसवः। अधिकरणवा
चिनश्चेति सूत्रात्। तत्राप्यकर्मकेभ्यः कर्त्तर्येव षष्ठी। इदमेषां शायितमिति। शायितं शयनाधिकरणं। क्तप्रत्ययेनो
क्तत्वाच्चेदमिति प्रथमा। सकर्मकेभ्यस्तु अधिकरणे क्तप्रत्यये कृते कर्तृकर्मणोर्द्वयोरपि षष्ठी। अनभिहितत्वा
विशेषात्। इदमेषां भुक्तमोदनस्य। भुक्तं भोजनस्थानं। नतु कर्मण्येवोभयप्राप्तौ कर्मणीत्यस्य कर्तृकर्मणोः कृ
तीत्येतदुत्तरं पाठेन तत्सूत्रविहितषष्ठ्या एव तेन नियमात्। तदेवं कृद्योगे सर्वत्र कर्तृकर्मणोः कृतीत्यनेन षष्ठीप्रा
प्तौ न लोकाव्ययनिष्ठाखलर्थतृनामिति सूत्रेण तत्पर्युदासः। लः। तदादेशाः। ते च कृत्संज्ञकाः। शतृशानजादयए
वेहग्रहंगे। तिङां कृद्ग्रहणे नैव नित्यत्वात्। तेन ओदनं पचन् पचमान इत्यादौ न षष्ठी अपितु द्वितीयैव। अत्र चल

कारग्रहणेन तत्कार्यापन्नानामपि ग्रहणं। तेन किंकिनोर्लादेशत्वाभावेपि लिङ्कार्यापन्नत्वाद्विशेषातिदेशे
च सामान्यातिदेशस्यावश्यकत्वात्तयोरपि ग्रहणं। अत एव बभ्रिर्वज्रमित्यादिप्रयोगा अपि संगच्छन्ते। उ। कटं
चिकीर्षुः। कन्यामलंकरिष्णुः। उकः। दैत्यान् घातुकः। कमेर्भाषायामनिषेधः इति वचनात् लक्ष्म्याः कामुको
हरिरित्यत्र षष्ठी। निष्ठा। ओदनं भुक्तवान्। चैत्रेण कृतं। खलर्थः। सुकरः प्रपंचो हरिणा। तृन्निति प्रत्याहारः।
सच्च शतृशानचाविति तृशब्दादारभ्य आ तृनो नकारात्। तेन शानच्चानश्शतृणामपि ग्रहणं। शानच्। सोमं प
वमानः। चानश्। आत्मानं मंडयमानः। शतृ। वेदमधीयन्। तृन्। लोकानां कर्ता। द्विषधातोस्तत्र शतुर्योगे तु विक
ल्पेन षष्ठी। द्विषः शतुर्वेति वचनात्। मुरस्य मुरं वा द्विषन्। सर्वेष्वप्ययं कारकषष्ठ्याः पर्युदासो न तु शेषषष्ठ्याः
आनंतर्येण तदेकवाक्यताया एव साध्यत्वात्। अत एव ब्राह्मणस्य कुर्वन्। नरकस्य जिष्णुः। छात्रस्य हसि

नमित्यादिप्रयोगा अपि संगच्छंते। एवं अकेनोर्भविष्यदाधमर्ण्ययोरिति सूत्राद्भविष्यत्कस्य भविष्यदाधमर्ण्या
र्थकेन च योगे षष्ठी न स्यादिसमर्थकां एधानाहारको व्रजति। व्रजं गामी। शतं दायी त्वाहेद्वितीयेव न षष्ठी। अत्र
भविष्यत्कालविहिताकस्यैव ग्रहणान्न कालसामान्यविहिताके ओदनस्य पाचकद्दसाहेद्वितीया। अत्र च व्या
ख्यानवशान्न यथासंख्यमन्वयः। अपि तु अकस्य भविष्यत्येव। इनस्तु उभयोः। तेन गामी स्वयं भविष्यती निः।
दायी स्वयमाधमर्ण्ये णिनिः। एवं कृत्यानां कर्त्तरि वेति सूत्रे भाष्यकारेण योगविभागकरणात् कृत्यानामभि
संबन्धभिन्नसत्त्वप्रतीते सूत्रे च उभयप्राप्तौ नेति पूर्वसूत्रस्थपदद्वयानुकर्षणाद्उभयोः कर्तृकर्मणोरनभि
धाने प्रसक्ता षष्ठी प्रसक्तौ कृत्यानां योगे षष्ठी नेसर्षकान्तेतव्याः। व्रजं गावः कृष्णेनेतव्यत्र न षष्ठी। अपि तु तृती
या द्वितीया च। अत्र हि नयतेर्द्विकर्मकत्वान्मुख्यकर्मणः कृत्येनाभिधानात् गौणे तु प्रथमा। अमुख्यकर्मणात्र

जस्यत्वनभिधानात्तत्र द्वितीया। यत्र तु कर्तृकर्मणोर्मध्येऽन्यतरस्य प्रत्ययेनाभिधानान्नोभयप्राप्तिस्तादृशकृत्सस्य
योगे कृद्योगनिमित्तकषष्ठ्या नियमेन प्रसक्तौ कृत्सानां कर्तरि वेति सूत्रेण कर्तृषष्ठ्या विकल्पविधानं। कर्तृव्यभि
दं कृत्येन कृत्स्नस्य वा। न च भावकर्मणोरेव कृत्सविधानात्तत्र च कर्मणः कृत्सेनाभिधानादेव तत्र षष्ठ्या। प्राप्तेः
परिशेषात् कर्तर्येव विकल्पविध्युपपत्तेः कर्तृकं ग्रहणं वैयर्थ्यं। भव्यगेयेति सूत्रेण कर्तर्यपि यत्सप्रत्ययस्य कृ
त्सविधानात्तद्योगे कर्मणि अनभिहितत्वेन षष्ठीप्राप्तिस्तत्र विकल्पव्यावृत्त्यर्थं कर्तृग्रहणोपपत्तेः। यथा गेयो
माणवकः। साम्नां। अत्र गेय इति कर्तरि कृत्सं। अभ साम कर्मक गान कर्त्ता माणवक इति शाब्दबोधः। एवं तुल्यार्थै
रतुलोपमाभ्यां तृतीयान्यतरस्यां इति सूत्रात्तुल्यार्थिकैस्तुलोपमवर्ज्जं भिन्नैः शब्दैर्योगे तृतीया स्यात् पक्षे षष्ठी
सार्थकात्तुल्यः सदृशः समो वा कृष्णेन कृष्णस्य वेत्यत्र पक्षे षष्ठी। अत्रातुलोपमाभ्यां इति द्विवचनं छांदसं।

भा॰र॰
१२६

126

५२

अन्यथाविशेषणविभक्तित्वेनवक्तृवचनापत्तेः। अयंचमंडूकप्लुत्याशेषषष्ठ्याएवपाक्षिकत्वफलकोविधिर्न
तुकारकषष्ठ्याः। तुल्यशब्दस्यतद्धितांतत्वेनकारकषष्ठ्याअप्राप्तेः। तुलोपमाशब्दयोगेतुशेषषष्ठ्येव। अतएवतुला
उपमावाकृष्णस्यनास्तीत्यत्रशेषेतृतीयायाअविधानान्नतृतीया। कथंतर्हितुलांयदारोहतिदंतवाससास्फु
टोपमंभूतिसितेनशंभुनाइत्यादिकाव्येषुतुलादिशब्दयोगेतृतीयेतिचेत्। तस्यास्तोलनोपमानादिरूपधात्व
र्थंप्रतिकरणत्वेनोपपत्तेः। सहयोगनिमित्तकावेयंतृतीया। साहिसंचन्निरूपकत्वं। तस्यचतत्वेनतृतीयांत
बोधः। अत्रतुशेषत्वार्थकतृतीयायाः पर्युदाससङ्गतिनकश्चिद्विरोधः। अत्रवक्तृवचननिर्देशेनैवतुल्यपर्या
याणांग्रहणोपपत्तावर्थग्रहणंपदांतरनैरपेक्ष्येणबोधकपरं। तेनगौरिवगवयः। यथागौस्तथागवयइत्यादौ
नषष्ठ्यादि। अथमोत्पत्तिप्रयोजकंतुपूर्वमेवोक्तं। एवंचतुर्थीचाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैर

राम
१२६

त्तिसूत्रादायुष्याद्यर्थकृपाद्ययोगे आशिषि विशेषे चतुर्थी स्यात्पक्षे षष्ठी समर्थकादायुष्याद्यस्मै अस्य वा भूया
दिति पक्षे षष्ठी। आयुष्यं चिरंजीवितं। मद्रं भद्रमेवानयोः पर्यायत्वेपि आयुष्यादिपदानामर्थपरत्वख्या
पनायोभयोपादानं। यत्तु व्याख्यानात्सर्वत्रार्थग्रहणोपपत्ते मद्रभद्रयोरन्यतरो न पठनीयः इति केचिदु
क्तं तद्भाष्यकारेणैतत्सूत्रस्याव्याख्यानादुपेक्षितं। कुशलं· निरामयं· सुखं· शं· अर्थः प्रयोजनं· हितं· पथ्यं·
न चाहितयोगे चतुर्थी वक्तव्येति वार्त्तिकादेव तत्सिद्धेर्हितग्रहणवैयर्थ्यं। अनाशिषि विते न तन्नियमे पि एत
स्याशिषि विकल्पं विधायकत्वोपपत्तेः। अतएवायुष्यादौ अनाशिषि षष्ठ्येव चैत्रस्यायुष्यमस्ती
ति। सर्वथा षष्ठ्यर्थः सर्वोप्याख्यातार्थेन्वेतीति सिद्धं। स च सम्बन्धोपि नञ्ञेवान्वेति। स च सप्तम्यधिकरणे
चेति सूत्रानुशिष्टोधिकरणत्वं। तच्चाधारोधिकरणमिति सूत्रनिरुक्तं। ननु अधिकरणत्वं नाम नयेन केनचि

त्संबंधेन संबंधित्वं। रूपरसादीनामपि परस्पराश्रयत्वापत्तेः। नापि स्वाधेयसंबंधित्वं। आधेयत्वस्यैव निवक्तुम
शक्तेः। तस्य स्वाश्रयसंबंधित्वरूपत्वे अन्योन्याश्रयप्रसंगाच्च। नापि कारणत्वं। निमित्तकारणादावतिव्या
प्तेः। नापि समवायीकारणत्वं। संयोगेन घटाद्याश्रये जातत्वाद्याश्रये समवायाश्रये च भूतलादावव्याप्तेः। य
त्तु तद्भिन्नत्वे सति तत्पतनप्रतिबंधकसंयोगाश्रयेश्वरवारणाय मूर्त्तत्वपदोपादानं वस्तुतस्तु यस्मिन्स
र्वं प्रतिष्ठितं। येनेदं धार्यते जगदिति वचनात्। वन्मूर्त्तत्वं पतनवन्मूर्त्तनिरूपिताधिकरणत्वं। पतमानपर्णा
द्याश्रयत्ववारणाय सत्यंतं। ब्रह्मांडादिधारकसंयोगादीश्वरेप्यस्त्येवाधिकरणत्वं। इतरथा ब्रह्मांडा
धारकत्वस्यैवानुपपत्तेः। अतो मूर्त्तत्वपदं नैव देयं तत्स्यंदद्रव्यानिरूपिताधिकरणत्वं। आकाशादीनां तु प्रमाणाभा
वादेव न द्रव्याधारत्वमाधेयत्ववत्। ईश्वरे तु उक्तवचनादाधारत्ववदाधेयत्वेपि यः पृथिव्यां तिष्ठन् पृथिवीमं

नि

तरोयमयतिईश्वरःसर्वभूतानांहृद्देशेऽर्जुनतिष्ठतीत्यादिश्रुतिस्मृतिवशान्नत्वतिः।गुणादिनिरूपिताधिकरण
त्वंसमवायित्वं।समवायादिनिरूपितंचतत्तत्स्वरूपसंबंधित्वमितिमतं।तदपिन।अननुगमात्।सप्तम्यानाना
र्थकत्वापत्तेश्चेतिचेत्।न।अनुगताकारप्रतीत्याप्रतियोगित्वादिवदधिकरणत्वाधेयत्वयोरधिकरणत्वा
धेयत्वत्वयोश्चाखंडयोरेवस्वीकारात्।शक्यतावच्छेदकैक्यानुरोधेनापिकरणत्वादिवत्पदार्थांतरकल्प
नेवाधकाभावाच्च।यत्रहिसखंडपदार्थस्यैवशक्यतावच्छेदकविषयाप्रतीतिरानुभविकीनतत्रतत्कथनं।घ ल्प
याविभ्वादिपदेषु।यत्रतुतद्घटकपदार्थाप्रतीतावपितत्प्रतीतिस्तत्रशाब्दव्यवहारानुरोधेनापितत्कल्पन
मसकृदावेदितं।तत्राधेयत्वमेवाधेयत्वत्वेनसप्तम्यर्थः।तच्चनिरूपकतासंबंधेनप्रातिपदिकार्थस्यभूतला
देरन्वयः।तस्यचानुयोगितादिसंबंधेनघटादावन्वयः।तेनभूतलेघटइत्यत्रभूतलवृत्तिर्घटइत्येवंशाब्दबोधइति

तार्किकाः। तन्न। सप्तम्यधिकरणे चेत्यनुशासनविरोधात्। भूतले घटो गृहे पचतीत्यादौ सर्वत्रैकरूप्येणान्वयानं-
गीकारेणानेकव्युत्पत्तिकल्पनापत्तेश्च। अतोधिकरणत्वमेव सप्तम्यर्थः। यद्यपि च संयोगसमवायाद्यवच्छि-
न्नानामधिकरणत्वानि नानानि तथापि अधिकरणत्वत्वस्य शक्यतावच्छेदकस्यैकत्वान्नानार्थकत्वं। तत्र चाधेय-
त्वसंसर्गेण प्रातिपदिकार्थस्यान्वयः। तस्य च निरूपकत्वघटितसंसर्गेणाख्यातार्थभावनायामन्वयः। तत्र भूत-
ले घट इत्यत्रास्तीत्यध्याहारात् सप्तम्यर्थाधिकरणत्वस्य स्वनिरूपकघटवृत्तित्वसंसर्गेणाख्यातार्थसत्ताश्रय-
त्वेन्वयः। भूतलनिष्ठाधिकरणत्वनिरूपकघटवृत्तिवर्तमानसत्ताश्रयत्वं घटवृत्तीति च शाब्दबोधः। न च पूर्वं घटे
भूतलस्यैसंप्रति चाधिकरणांतरस्यै भूतले घटोस्तीति प्रयोगापत्तिः। यादृशकालबोधक[illegible]बोध्यक्रिया-
योयां सप्तम्यर्थाधिकरणत्वान्वयस्तादृशकालावच्छिन्नाधिकरणत्वस्यैव व्युत्पत्तिविशेषेण सप्तम्या बोधना

त्वाग्रहे चैत्रः पचतीत्यत्र स्वनिरूपकचैत्रवृत्तित्वसंसर्गेणाख्यातार्थकृतौ स्थाल्यामोदनं पचतीत्यत्र स्वनिरूपकौ
दनकर्मकत्वसंसर्गेण तस्यामेव। अत एव सर्वत्र सप्तम्यर्थस्य स्वनिरूपककर्तृकर्मान्यतरद्वारक एवाख्याता
र्थान्वयः। ननु कारकान्तरद्वारकः साक्षाद्वा काश्यां ब्राह्मणेभ्यः प्रयच्छतीत्युक्ते कर्तुरेव झटिति काशीस्थत्वप्रती
तेः। यत्तु पाटलिपुत्रे स्थितो राजा काश्यां ब्राह्मणेभ्यः प्रयच्छतीत्यादौ ब्राह्मणेषु काशीवृत्तित्वप्रतीतिं संस्थि
तेभ्य इति पदाध्याहारेण स्थितिकर्तृद्वारकैवेति न विरोधः। अत एव भूम्हेति वृक्षाद्भूमौ पर्णं पततीत्यत्र स्थि
तादिति पदाध्याहारं विना न झटिति वृक्षे भूम्ये वृत्तित्वप्रतीतिः साक्षात्तु सप्तम्यर्थस्य भावनान्वयो ग्रहादौ
बाधित एव। चैत्रादेस्तु परया कर्तृसंज्ञया बाधितः। अतः सिद्धं कर्तृकर्मान्यतरद्वारक एव सप्तम्यर्थान्वय इति।
नन्वेवं कर्माविवक्षायां ग्रामे गच्छति ग्रामे गम्यत इति प्रयोगानापत्तिः। ग्रामाधिकरणत्वस्य कर्तृकर्मद्वारकत्वा

भा०र०
१२९

129

संभवात्।लक्षणयात्उद्देश्यत्वंतत्रसमभ्यर्थइतिचेत्।ओदनेपचतीत्यादिप्रयोगापत्तेः।अतएवधात्वर्थतावच्छेद
कफलव्यधिकरणत्वान्वयइत्यपिपास्तं।ओदनस्यापितदापत्तेरितिचेत्।तत्रापिकर्तृकत्वस्यसंभवात्।ग्रामाधिक
रणकचैत्रवृत्तिगमनानुकूलकृतिमत्त्वस्यचैत्रेसंभवात्।अन्यावच्छेदेनग्रामप्राप्तिफलकक्रियावत्त्वमपि
चैत्रेग्रामाधिकरणत्वस्याभावित्वात्ग्रामाधिकरणचैत्रवृत्तिगमनानुकूलकृतिमत्त्वस्यचैत्रे [illegible]
नानुपपत्तिः।पाककर्तुस्तुओदनाधिकरणत्वाभावान्नतथाप्रयोगः।नन्वेवमपिअग्नौपचतिआतपेतिष्ठ
ति।आकाशेपक्षीगच्छतियत्रआकाशेतिष्ठन्नाकाशमन्तरीयमयतीत्यादिप्रयोगानुपपत्तिः।अग्न्याद्यधिक
रणत्वस्यकर्तृकर्मान्यतरवारकत्वायोगात्।नचाग्नौपचतीतिप्रयोगोनास्त्येवेतिकेचिदुक्तंयुक्तं।यस्मिन्न
ग्नौपचेदन्नंतस्मिन्होमोविधीयतेइत्यादिव्युत्तरप्रयोगदर्शनात्।नहितत्रनियामकसंयुक्तसंयोगाधि

हा०र

राम
१२९

दिसंबंधस्या

करणतानिरूपकत्वं संभवति। अन्यथा आकाशे मनुष्यास्तिष्ठ, चैत्रो मैत्रात्मनि तिष्ठतीत्यादिप्रयोगापत्तेरिति
चेत्। तादृशस्थले गंगायां घोषः इतिवद्गंगापदेन तत्संबंधिस्थानत्वादिलक्षणया तन्निष्ठाधिकरणत्व
स्य कर्तृकर्मान्यतरद्वारान्वयोपपत्तेः। तेन अग्नौ पचतीत्यादेः अग्निसंयुक्तस्थाल्यां पचति आतपसंयुक्ते गृहे
तिष्ठति सर्पः। आकाशपदेन च गमनप्रतिबंधकमूर्तप्रदेशानवच्छिन्नप्रदेशो लक्ष्यते। यमंतरिक्षमिति व्यव
हरंति। सप्तम्याश्चावच्छेदकत्वं। विषयत्वादिवत्तस्य विभक्त्या लक्षणायामपि न दोषः। तस्य चोद्देश्यत्वादि
वत्सप्तम्यर्थस्यापि साक्षात्संबंधेनैव गमनसंबंधित्वं। नहि सप्तम्यर्थमात्रेयं नियमोऽपि तु सप्तमी वाच्य
एव। तच्च प्रकृतेऽप्रयोगादधिकरणत्वमेवेति तत्रैवायं नियमः। धातुना च निराधारगमनं। तथा चोक्तविध
मूर्तप्रदेशानवच्छिन्नप्रदेशावच्छिन्ननिराधारगमनानुकूलकृतिः पक्षिनिष्ठेति शाब्दबोधः। आकाशेति

भा०२०
१३०

130

ष्ठन्निमाहैसंयुक्तसंयोगावच्छिन्नं संबधित्वं लक्षणया सप्तम्यर्थः। षष्ठ्यर्थस्यापि स्तुपांसु पइत्येवं लक्षणा। तस्यापि
पूर्ववर्द्दत्वर्थद्वारकः कर्तृद्वारक एव वा संसर्गः। वस्तुतस्तु आकाशस्याधीश्वरोपादनकत्वादुपादानत्वमेव सप्तम्यर्थः
कर्तृद्वारको न्वेति। आकाशेठ यादानकारणत्वादनुगतः तिष्ठन्तीत्यर्थः। अस्तु वा एतद्वचनबलादेवाकाशो विशद
निरूपिताधारत्ववदेतथा मिथ निरूपिताधारत्वमपीति न तत्र लक्षणा वि। नचैव मग्नौ पचतीत्यादिप्रयोगाणां
लक्षणयोपपादने आकाशे मनुष्यास्तिष्ठन्तीत्यादिप्रयोगापत्तिः। यत्र प्रयोगस्तत्र लक्षणयोपपादनं न तु
क्वचिल्लक्षणांगीकारमात्रेण प्रयोगापत्तिः। तथा त्वेगंगायां घोष इत्यादौ गंगापदेन गंगासंबंधितीरलक्ष
णायाः सर्वसंमतत्वेन भवदुक्तप्रयोगापत्तेरनिवारणात्। अतः सिद्धं सप्तम्यर्थाधिकरणत्वस्य कर्तृकर्मान्य
तरद्वारकोन्वय इति। स्तुयग्रहाबहिं स्थितेन कत्रीदीघदंडादिना काष्ठादिचालनद्वारा गृहमध्ये पाककरणे

राम
१३०

गृहे पचतीति प्रयोगः। सकर्मकारकस्य तंडुलादेः परं परया गृहाधिकरणत्वान्नानुपपन्नः। नन्वेवमपि भूतले
घटो नास्ति चैत्रो गृहे न पचतीत्यादौ कथं कर्तृकर्मान्यतरद्वारको ऽन्वयः। नहि तत्र भूतलनिष्ठाधिकरणत्वनिरू
पकघटवृत्तिसत्ताश्रयत्वं अभावप्रतियोगि इत्येवं शाब्दबोधः संभवति। भूतले घटदशायामपि तथा प्रयोगा
पत्तेः। उक्ताश्रयत्वस्य घटातिरिक्तवृत्त्यभावप्रतियोगित्वात्। नञा घटनिष्ठाभावलक्षणायामपि प्रतियोगि
तावच्छेदकावच्छिन्नप्रतियोगिनो ऽप्रसिद्धेश्च। तद्वाक्यादनुभूयमानघटत्वावच्छिन्नप्रतियोगिताकभूत
लनिष्ठाभावबोधस्यापलापापत्तेश्च। न चैतद्विधाभावो स्तीति तादृश एव बोधो नञा जनितुं शक्यः। भू
तलनिष्ठाधिकरणत्वस्य सप्तम्यर्थस्याभावे द्वारकत्वापत्त्या कर्तृद्वारकत्वनियमभंगापत्तेः। घटस्य प्रति
योगिताकत्वसंसर्गेणाभावान्वये धात्वर्थाश्रयत्वाभावेन कर्तृत्वाभावात्तथामानुपपत्तेश्च।

कर्म

भूतलवृत्तिघटप्रतियोगिकाभाववत्त्वस्य कर्तृत्वोक्तौ तस्यैकत्वाद् घटौ न स्त इति द्विवचनानुपपत्तेश्च। घटो नास्ती
ति प्रयोगानुपपत्तेश्च। घट एव प्रतियोगितासंबंधेनाभावान्वयं अभावे च भूतलाधिकरणत्वाद्यन्वयमंगीकृ
त्य भूतलवृत्त्यभावप्रतियोगी घटोऽस्तीति शाब्दबोधांगीकारे तु अतीते भाविनि वा घटेऽस्तीति वर्त्तमानका
लान्वयानुपपत्तेर्घटो नास्तीति प्रयोगानुपपत्तिः। एतेन भूतलाधेयत्वाभाववान् घटोऽस्तीत्यपि शाब्दबो
धः प्रयुक्तः। अथैतद्दोषपरिहारार्थं सप्तम्यर्थस्याधिकरणत्वस्य निरूपकतासंबंधेन धात्वर्थकाल
संबंधेऽन्वयः। तत्रैव लडर्थान्वयो वा। तस्य चाश्रयत्वे आख्यातार्थे तस्य प्रतियोगितया कालसंसर्गेण नञ
र्थे अभावे तस्य च प्रथमान्तार्थे घटादाविति। भूतलनिष्ठाधिकरणतानिरूपकवर्त्तमानकालसंबंधा
श्रयत्वप्रतियोगिकाभाववान् घट इति च शाब्दबोधः। भावनान्वयाभावप्रतियोगिनि च संख्यान्वयो न

[illegible]ञ्समभिव्याहारस्थले लड् इति मतं। तदपि न। सप्तम्यर्थस्य साक्षाद्धात्वर्थान्वयाव्युत्पत्तेः। [illegible]
विवक्षायां चैत्रे पच्यताम् इति भावे प्रयोगापत्तेः। अत एव सप्तम्यर्थस्य धात्वर्थान्वये परं परापदोपादानं क-
र्तृकर्मान्यतरवारकत्वोपादानं वा प्रामाणिकानां। न च नञ्समभिव्याहारस्थले साक्षात्संबंधेनान्व-
यव्युत्पत्तिकल्पनमिति केषांचिदुक्तं युक्तं। चैत्रेण पच्यत इति प्रयोगस्येदमपि निवारयितुमशक्यत्वा-
त्। आख्यातार्थभावनासंख्यादेर्नञ्समभिव्याहारसत्त्वेऽप्यन्वयबोधकव्युत्पत्त्यंतरकल्पनापत्तेश्च। ए-
तेन नञ्समभिव्याहारस्थले धातुनाशकार्थाभावो लक्ष्यते। नञस्तद्द्योतकत्वात्तात्पर्यग्राहकत्वमेव।
सप्तम्यर्थस्य लडाद्यर्थस्य च व्युत्पत्तिविशेषकल्पनया धात्वर्थभूताभावप्रतियोगिनिशकार्थकालसंबं-
धादावन्वयः। भूतलनिष्ठाधिकरणतानिरूपकवर्त्तमानकालसंबंधप्रतियोगिकाभावाश्रयत्वं घटस्य

त्तीत्यादिष्विव शाब्दबोधः। भावनासंख्यादेश्चानन्युपसर्गान्तरकल्पनमिति केचित्। चिरंतनमपास्तं। कल्पनागौर
वस्य तद्वस्थत्वात्। चैत्रेण पच्यत इति प्रयोगापत्तेश्च गृहेण पचतीति प्रयोगानापत्तेश्च। गृहस्य साक्षात्
पाकाधिकरणत्वाभावात्। अथ तत्र कर्तृत्वकारकान्वयस्वीकारेपि भूतले घटो नास्तीत्यत्रेव सप्तम्यर्थस्य धात्व
र्थभूताभावप्रतियोगिनिकालसंबंधेन्वय इति मतं ततो स्मार्त्य धातुघटितव्युत्पत्तिकल्पनादिति गौरवं।
गृहेण पचतीत्यादौ च गृहाधिकरणकचैत्रवृत्ति पाकस्याप्रसिद्धेर्न तदभावो धातुनाबोधयितुं शक्य इति
तत्र शाब्दबोधानुपपत्तिस्तदवस्थैवेति चेत्। नाऽदानीं भूतले घटो नास्तीत्यादावपि भूतलाधिकरणकघ
टवृत्तिसत्ताश्रयत्वं घटनिष्ठाभावप्रतियोगीत्येव शाब्दबोधात्। प्रसिद्धं हि घटस्य भूतलाधिकरणकत्वं
कालांतरे। अतो न प्रतियोगिनोऽप्रसिद्धिः। न वा धुमसंतरकल्पनं। तथा हि। सप्तम्यर्थस्य तावन्निरूक्तसं

सर्गेणैवाख्यातार्थेऽन्वयः। अयमार्थस्यापि क्लृप्तसंसर्गेण तत्रैव। नञापूर्वं लङाद्यर्थकालावच्छिन्नघटनिष्ठा-
भावलक्षणः। लङादिश्च तात्पर्यग्राहकमात्रं। इदानीपदस्य च निपातत्वान्नञर्थान्वयेपि न क्षतिः। संभवति हि
उक्तसत्ताश्रयत्वाभाव एतत्कालावच्छेदेन घटे। एतस्मिन्काले एतद्भूतले घटाभावात्। अत एव भूतलवृत्ति-
घटाभावस्याप्यर्थादनुभूयमानस्य नापलापः। यत्र त्वधिकरणे कदापि न कर्त्रादिसत्ताप्रसिद्धा तत्रापि
न कर्त्तुर्घटत्वादिना संसर्गघटकतायेन प्रतियोग्यप्रसिद्धिराशंक्येत। अपि तु प्रकृतक्रियाश्रयत्वेनैव। तथा
च भूतलनिष्ठाधिकरणतानिरूपकवृत्तिवर्त्तमानसत्ताश्रयत्वं भूतलवृत्तिपरमाणावाकाशादावेव प्रसिद्धं।
अयमेव वा प्रकारः सर्वत्रानुसंधेयः। एवं लङाद्यर्थस्यापि धात्वर्थान्वयो न क्षतो भवति। तात्पर्यग्राहकत्व-
स्यापि च स्वीकारात्तत्कालावच्छिन्नघटनिष्ठाभावप्रतियोगित्वमुक्तविधाश्रयत्वे अव्याप्तं। यदि त्व

भा०१०
१३२
133

स्मिन्पक्षे घटे स्याख्यातार्थसाक्षात्संबंधेनानन्वयात्कर्तृत्वानुपपत्तिराशंक्येत ततो स्वाख्यातार्थे स्यै
वउक्ताश्रयत्वप्रतियोगिकोक्तविधाभावे सप्तमीनञोनयसमभिव्याहारे लक्षणा। नञ्पदं च तात्पर्यग्रा
हकमात्रं। तस्मिंश्चाभावे घटस्याधेयत्वसंबंधेनैवान्वयात्कर्तृत्वोपपत्तिः। सप्तम्यर्थस्य च तस्मिन्नेवा
भावे कर्तृघटितपरंपरासंबंधेनान्वयान्नत्वनुसन्नंतरकल्पना। उक्तविधाश्रयत्वत्वावच्छिन्नप्रतियोगि

का

ताभावश्च घटेन घटस्य भूतलवृत्तिता दृशायामित्यर्थात् भूतलाधिकरणक घटाभावबोधः। एवं वा
योरूपं नास्ति कुंदे वह्निर्नास्ति जातौ सत्ता नास्तीत्यादिप्रयोगा अपि उपपादनीयाः। नच समवायसं
बंधेन जातिवृत्तेः अप्रसिद्ध्या समवायसंबंधावच्छिन्नजातिनिष्ठाधिकरणतानिरूपकवृत्ति विद्यमान
कालत्वसंबंधाश्रयत्वाप्रसिद्धेः। कथं तदभावस्य सत्तायां बोध इति वाच्यं। जातावपि साक्षात्स्वरूपसंबं

राम
१३२

ग २

घेनवृत्तेः प्रसिद्धत्वात् सत्तायामपि निरुक्तसामान्याभावोपपत्तेः। ज्ञातौ समवायेन सत्ता नास्तीति प्रयो
गस्य निरुक्ताभ्रयत्वस्यैव व्यधिकरणसंबंधावच्छिन्नाभावमादाय उपपादनीयः। समवायेन सत्त्वस्य चा
ख्यातार्थाश्रभावे स्वावच्छिन्नत्वसंबंधेनान्वय इति न काप्यनुपपत्तिः। एवं गृहे चैत्रो न पचतीत्यादा
वपि पूर्ववदेव सर्वैः प्रकारैर्बोधोपपादनं द्रष्टव्यं। तत्र त्वयं विशेषः। चैत्रस्य गृहस्थत्वे पाकाश्रयत्वा
भावमादाय पाकाश्रये त्वे गृहस्थत्वाभावमादाय उभयाभावे चोभयाभावमादाय विशिष्टाभावः संपा
दनीयः। तत्र दभाववोध एव च तात्पर्यभेदेन फलं। एवं स्थाल्यां तंडुलं न पचति चैत्र इत्यत्रापि स्थाल्यां तं
डुलवृत्तित्वाभावे तंडुलस्य पाककर्मत्वाभावे पाकस्य चैत्रवृत्तित्वाभावे च तात्पर्यभेदो द्रष्टव्यः। तात्पर्यग्रा
हकांतराभावे तु स्थाल्यीपदस्यैव यथा भियात्राद्याभाव एव कटिमर्थान्मती यते। अत एव न जीवत् पितृकः।

भा०र०
१३४

134

कुर्यात्तिलैः कुशैश्चतर्पणमित्यादौ कृत्स्नत्वाभाव एवतात्पर्यं न तु तिलतर्पणाभावादौ इति व्याचक्षते वृद्धाः। नां
तरिक्षेऽग्निश्चेतव्य इत्यादौ तु सप्तम्यर्थस्य कर्तृकर्मद्वारकत्वासंभवेन प्रतियोग्यप्रसिद्ध्यापत्तेरगत्यानञ्स
मस्यं नाभ्यां अंतरिक्षवृत्त्यभावलक्षणया तत्प्रतियोगित्वमाख्यातार्थेऽन्वीयत इति तस्य निसानुवादना। तत्र
सप्तम्यर्थस्य स्वातंत्र्येणान्वयाभावादेव न व्युत्पत्त्यंतरकल्पना। पदद्वयलक्षितार्थस्याख्यातार्थेऽन्व
येनिपातोपसर्गप्रातिपदिकातिरिक्तपदार्थगम्यत्वाद्वक्ष्यमाणव्युत्पत्त्यैव निर्वाहोपपत्तेर्न व्युत्पत्त्यंतरकल्प

वा

ना। अत एवापर्यवादैकपलक्षणप्राप्तास्तस्याप्यनयैव व्युत्पत्त्या आख्यातार्थभावनान्वयः। अंतरिक्षे घटो
न पचतीत्यादौ च सप्तम्यंतनञ्धातुभिरंतरिक्षवृत्तित्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकपा
काभावो लक्ष्यते। आख्यातेन चाश्रयत्वं। तथा चोक्तविधाभावाश्रयत्वं घटस्त्वीतिशाब्दबोधः। अं... पन

राम
१३४

सप्तम्यर्थान्वय इति नञ्जत्रापि सप्तम्यर्थस्य कर्तृकर्मान्यतरधारकत्वव्यभिचारः। यत्र तु न सप्तम्यन्तपदसम
भिव्याहारश्चैत्रो न पचतीत्यादौ तत्र नञर्थस्य चैत्रवृत्त्यभावस्य चैत्रवृत्तित्वेन प्रतियोगितासंबंधेनान्व
यो घटवावर्त्तमानपाकानुकूलकृत्यभावमाख्यातेन लक्षयित्वा तस्मिंश्चैत्रान्वय इत्यादि बोध्यं। एवं लि
ङादिसमभिव्याहारेपि चैत्रो न फलं जंभक्षयेदित्यादौ यत्र चैत्रवृत्तिकृतिप्रसिद्धिस्तत्र तस्यां न फलं
जंभक्षयेदितिवदेव विध्यर्थस्य स्वप्रयोज्याभावप्रतियोगित्वसंसर्गेणैव नञर्थस्यापि चैत्रवृत्त्यभा
वस्य प्रतियोगितासंसर्गेणान्वयः। अप्रसिद्धौ त्वाख्यातेन पाकानुकूलकृत्यभावं लक्षयित्वा तस्मि
न् विध्यर्थस्य प्रयोज्यत्वेन चैत्रस्य चाधेयत्वेनान्वय इति सर्वमनवद्यं। तच्चाधिकरणत्वं त्रिविधं। औ
पश्लेषिकं वैषयिकं अभिव्यापकं चेति। कटे आस्ते। घटे ज्ञानमस्ति। मोक्षे इच्छास्ति। सर्वस्मिन्नात्म

मा०२०
१३५
द्वे
135

स्ति। तिलेषु तैलमस्ति। उपश्लेषः सावच्छिन्नवृत्तित्वं। वैषयिकं विषयतासंबंधावच्छिन्नं। अभिव्यापकं अव
च्छेदकावच्छेदेन वृत्तिमत्। सप्तम्यधिकरणे चेति चकाराद्दूरांतिकार्थेभ्योपि सप्तमी। वनस्य दूरे अंतिके वा ग्रा
मः। दूरत्वावच्छिन्ने प्रदेशे प्रतियोगित्वं षष्ठ्यर्थः। यद्यप्यत्राधिकरणत्वादेव सप्तमी प्राप्ता तथापि द्वितीया
दिविभक्तित्रयेण विशेषविहितेन बाधप्रसक्तौ प्रतिप्रसवार्थश्चकारः। एवं क्तस्येन्विषयस्य कर्मण्युपसं
ख्यानमिति वार्त्तिकादिन्नंतः शब्दो विषयो वर्त्तनभूमिर्यस्य पदुपरि इन्नंतः शब्दः स्वार्थस्तादृशात्क्तप्रत्यय
स्य वस्तुनो यत्कर्म तस्मिन् सप्तमी। अधीती व्याकरणे इति सप्तमी। अधीतमनेनेति विग्रहः। इष्टादिभ्य
श्चेति सूत्रेण कर्त्तरि इनि प्रत्ययविधानात्। एतस्य च तद्धितत्वेन कृतन्नवीकत्वमिति वद्वितीयायां प्राप्तायां
कर्मणि सप्तमी। विधिस्तादृशो येन। शाब्दबोधश्च तद्देव। कर्म चात्र मुख्यमेव न तु मासादि। तेन मासमधीती

राम
१३५

व्याकरण इत्यत्र काले द्वितीयैव। एवं साध्वसाधुप्रयोगे चेति वार्त्तिकात् साधुः। कृष्णो मातरि भवति। असाधुर्मा
तुल इत्यत्र सप्तमी। अत्र वैयधिकरण्यादिनाधिकरणसप्तम्येव सिद्धौ पुनर्वचनं षष्ठीनिषेधार्थं। न च साधुनि
पुणाभ्यामर्चायां सप्तम्यप्रतेरिति वक्ष्यमाणसूत्रेणैव साधुशब्दयोगे सप्तमीसिद्धेरेतद्वार्त्तिके साधुशब्दग्रहणं वैयर्थ्यं।
अनर्चायां प्रतिनायोगेपि साधुशब्दयोगे सप्तमी स्यादेवं साधकात्। न चैवं साधुर्भृत्यो राज्ञ इति षष्ठीप्रयोगानाप
त्तिः। तत्र राज्ञो भृत्यद्वारकान्वयस्वीकारेण साधुत्वद्वारकान्वयानंगीकारात्। न चैवमप्यर्चानर्चादिसाधारण्ये
न साधुशब्दयोगे सप्तमीविधौ वक्ष्यमाणसूत्रे अर्चाग्रहणं वैयर्थ्यं। निपुणपदयोगेऽर्चायामेव सप्तमी स्यादेवं साध
क्यात्। न चैवमेतद्वार्त्तिकेनैव साधुशब्दयोगे सप्तमीविधिसिद्धेर्वक्ष्यमाणसूत्रे साधुशब्दग्रहणं वैयर्थ्यं। उत्त
रभाविवार्त्तिकेन पूर्वभाविसूत्रवैयर्थ्यशंकाया अनुक्तिसहत्वात्। एवं निमित्तात् कर्मयोगे इति वार्त्तिकाच्च

भा०र० १३६ 136

र्मणि द्वीपिनं हन्ति दंतयोर्हंति कुंजरं। केशेषु चमरीं हंति सीम्नि पुष्कलको हतः इत्यादौ सप्तमी। अत्र निमित्तं फलत्वादि
नाक्रियाप्रयोजकं। अतएव प्रयोज्यत्वं सप्तम्यर्थः। साक्षात् [illegible] संबंधेन क्रियान्वयि। तस्य च कर्मकारकयोगः संयो
गसमवायादिर्वास्त्वेव एव सप्तमीप्रयोजको न तु शाब्दबोधे ज्ञातः। अतएव तदभावे वेतनेन धान्यं लुनाती इत्यादौ
हेताविसनेन तृतीयेव। तृतीयापवादत्वेनैव चायं सप्तमीविधिः। तादर्थ्ये चतुर्थ्यपवादत्वेन वा। तदा वेतनाय धा
न्यं लुनातीत्यपि प्रयोगः। अत्र जिष्णु उद्धारणे समवायात्वः कर्मकारकसंबंधो वयवावयविभावात्। चतुर्थे तु सं
योगः। सीम्नो ज्ञानार्थं पुष्कलकः शंकुर्निखात इति तदर्थात्। एवं यस्य च भावेन भावलक्षणमिति सूत्रा घृतसं
बंधिन्या निर्ज्ञातकालया पया क्रियया अनिर्ज्ञातकालायाः क्रियायाः कालपरिच्छेदात्वं लक्षणं क्रियते तस्य
तस्यां क्रियायां कर्त्तुः कर्मणो वास्वाक्रियाधारके इतर क्रियालक्षकत्वे विवक्षिते तद्बोधकात् सप्तमी स्यादित्यर्थः

राम १३६

काद्बास्तेणोष्वधीयानेषु गतः। गोषु दुह्यमानासु गत इत्यादौ सप्तमी। अत्र कर्तृत्वकर्मत्वान्यतरसंबंधेन स्वसंबंधि
क्रियाकालकत्वं सप्तम्यर्थः। तस्य च साक्षात्संबंधेनेतरक्रियान्वयः। पूर्वक्रियायाश्च कर्तृकर्मविशेषेष्वपि सप्त
मीलक्ष्यसंबंधिसंसर्गघटकत्वमपि नानुपपन्नं। एवं च यत्र इको यणचीत्यादौ क्रियानोपात्ता तत्र सतीति सत्ता
रूपक्रियाध्याहारो बोध्यः। यत्र तु संबंधिनो लक्षकत्वं न विवक्षितं तत्र गावो दुह्यंते चैत्रो गत इति वा वाक्यद्वयप्र
योगः। अत एव तत्र पूर्वक्रिया याऽइतरक्रियोपलक्षकत्वबोधः कविकाव्यादिवन्मानस एव। अत एव च समाना
धिकत्वाभावान्न सप्तमीविधिस्तद्बाधकोऽपि तु पूर्वविधिः कथंचित्षष्ठी बाधकोऽपि वेति ध्येयं। यत्तु क्रि[illegible]
क्रियाकर्तृत्वादौ विवक्षिते सप्तमी क्रियानर्हाणां च तदभावे विवक्षिते सप्तमी तथा क्रियार्हाणां तदभावे क्रिया
नर्हाणां च तास्मिन् विवक्षिते सेत्येवं वार्त्तिकं सत्सु तरत्सु रुह्यमानेषु वा असंत आसते न पूज्यंते वा। असत्सु तरत्सु

असत्सु तिष्ठत्सु भक्ष्यमानेषु वा संतस्तत्र तिष्ठत्सु पूज्यंते वा॰ सत्सु तिष्ठत्सु भक्ष्यमानेषु असंतस्तत्र तिष्ठत्सु पूज्यंते वा॰ १

सुभुज्यमानेषु वासंतस्तिष्ठंतिन भुज्यंते ते वेत्यत्र सप्तमीविधायकं तद्यस्य च भावेन भावलक्षणमित्यनेनैव सिद्धेरना
रंभणीयमिति केचित् । कैयटादयस्तु लक्ष्यलक्षणभावाविवक्षायां सप्तमीविधानार्थमिदमाहुः । तन्न । लक्ष्यल
क्षणभावातिरिक्तसंबंधस्यात्रस्माद्वाक्यादभाने तत्रास्मिन्नर्थे सप्तमीविधानवैयर्थ्यापत्तेः । अतोऽर्हत्वाद्यवच्छिन्न
कर्तृत्वकर्मत्वान्यतरसंबंधेन स्वसंबंधिक्रियाकालकालत्वस्य सप्तम्यर्थद्योतनायानुशासनांतरं । तथा हि अत्र
प्रथमवाक्यद्वये ऽर्थो ऽचितत्वं व्यंग्यं । अंत्यद्वये चानौचित्यं । तदुपपादकत्वं निरुक्तसप्तम्यर्थस्य । तद्विशेषणीभूता
र्हत्वाद्युपपादनार्थं । त्रिषु तु आसत इत्येताभ्यां पदाभ्यां तरणाभावो लक्ष्यते । सदसत्पदाभ्यां च वाच्यव्यंग्यविध
या क्रियार्हत्वानर्हत्वे व्यज्येते । अत एवैतादृशलक्ष्यलक्षणभावस्य गोषु दुह्यमानासु गत इत्यादिव्यावृत्तस्या
त्र विधिव्याख्यानुरूपमानस्यापह्नोतुमशक्यत्वात्पृथगनुशासनं । एवं षष्ठी चानादर इति सूत्रादनादरविधि

एतल्लक्षणभावविवक्षायां षष्ठीसप्तम्यौ विकल्पेनारुदति रुदतो वा प्राव्राजीत्। रुदंतं पुत्रमनादृत्येत्यर्थः। एवं
स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्चेति सूत्रादेभिः सप्तमियोगे षष्ठीसप्तम्यौ स्तः। गोषु गवां वा
स्वामी। निरूपकत्वं विभक्त्यर्थः। तस्य च स्वाम्यादिद्वारकोस्ति क्रियान्वयः। समानार्थकस्वाम्यादित्रयग्रहणं प
र्यायांतरनिवृत्त्यर्थं। विरूपाणामपि समानार्थानामिति वार्त्तिकादेकदंडादिवत् पदत्रयेकशेषस्तु शब्दस्व
रूपपरत्वान्नाशंक्यः। गवां गोषु वा प्रसूतः। गा अनुभवितुं जात इत्यर्थः। इति हरदत्तः। एवं आयुक्तकुशला
भ्यां चासेवायामिति सूत्राद्गोषु गवां वा आयुक्तः कुशलो वा इत्येवं षष्ठीसप्तम्यौ। आयुक्तो व्या पारितः॥
विषयसप्तम्यां प्राप्तायां पक्षे षष्ठी विधीयते। आसेवा तदेकपरत्वं तदभावे तु आयुक्तो गोः शकटे ईषद्युक्त
इत्यर्थः। एवं यतश्च निर्धारणमिति सूत्राज्जातिगुणक्रियासंज्ञाभिर्यतः समुदायादेकदेशस्य पृथक्करणात्

कं निर्धारणं क्रियते तद्वाचकात् षष्ठीसप्तम्यौ स्तः। नृणां नृषु वा ब्राह्मणः श्रेष्ठः गवां गोषु वा कृष्णा बहुक्षीरा। ग
च्छतां गच्छत्सु वा धावन्शीघ्रंगामी छात्राणां छात्रेषु वा मैत्रः पटुरित्यादौ। अत्र विभक्त्यर्थ उक्तविधं निर्धारणं।
तत्र च निरूपकतया प्रकृत्यर्थान्वयः। तस्य च विषयीभूतब्राह्मणादिवृत्तित्वसंसर्गेण क्रियान्वयः। इदं च
यदोपात्तस्य निर्धारणप्रतियोगितावच्छेदकस्य मनुष्यत्वगोत्वादेर्निर्धारणविषयीभूते ब्राह्मणादौ सत्त्व
एव विकल्पाभिधानं बोध्यं। यदा तु तस्य तत्रासत्त्वं तदा निर्धारणप्रतियोगिवाचकात् पंचम्येव पंचमी विभ
क्ते इति सूत्रात्। माथुराः काशीयेभ्यः आढ्यतमाः। एवं साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेरिति सूत्रान्मा
तरि साधुर्निपुणो वा इत्यत्र सप्तमी। अर्चाभावे निपुणो राज्ञो भृत्य इति षष्ठी। प्रतिग्रहणमुपलक्षणं। साधु
र्निपुणो वा मातरं प्रति परि अनु वा। सर्वमेवच व्याख्यातप्रायमिदं सूत्रं। एवं प्रसितोत्सुकाभ्यां तृतीया चेति

स्त्वादाभ्यांयोगेतृतीयास्यात्।सप्तमीवेत्यर्थकात्।प्रसितउत्सुकोवाहरिणाहरौवेत्यत्रविकल्पेनसप्तमी।प्रसि
तः आसक्तः। ननुप्रकर्षेणाभुक्तः। विषयत्वंविभक्त्यर्थः। तृतीयायाःयाप्तिकत्वार्थवचनं। एवंनक्षत्रेचलुपी
तिसूत्रान्नक्षत्रवाचिप्रकृतेर्नक्षत्रेणयुक्तः कालइत्यनेनाणुत्पन्नस्यलुब्वाविशेषइतिलुपिकृतेनक्षत्रयु
क्तकालप्रतिपादकात्प्रातिपदिकादधिकरणत्वेतृतीयासप्तम्यौस्तइत्यर्थकात्मूलेनमूलेवादेवीमावा
हयेदित्यादौसप्तमी। कालिकाधिकरणत्वंविभक्त्यर्थः। अल्पप्रसयाकरणेनमुहूर्तनक्षत्रपरत्वेपुष्येणानि
रित्यादौसप्तम्येवनतृतीया। कालपरत्वेप्यधिकरणत्वाविवक्षायामघाःपुष्यइत्यादौप्रथमापि। एवंसप्त
मीपंचम्यौकारकमध्येइतिसूत्रात्सजातीययोर्विजातीययोर्वाकारकयोर्मध्येयौकालाध्वानौतत्रसप्त
मीपंचम्यौस्तइत्यर्थकादद्य[illegible]भुक्त्वायंद्व्यहेद्व्यहाद्वाभोक्ताइहस्थोयंक्रोशेक्रोशाद्वालक्ष्यंविध्येदित्या

भा०२०
१३९
139

स्यादौ विकल्पेन सप्तमी। अत्र यद्यपि भोजनद्वयेप्येक एव तु रूपः कर्तृकारकं तथाप्यैतनकालीनभोजनक्रियानि-
रूपितकर्तृत्वाद्यह्नकालीनभोजनक्रियानिरूपितकर्तृत्वस्य भेदात्कारकत्वमध्यस्तं। द्वितीयोदाहरणे तु त्र-
यमिति कर्त्तालस्यमिति कर्मद्वहे साधिकरणमिति विजातीयमध्यं। सर्वत्राधिकरणत्वं विभक्त्यर्थः। अपा-
दानत्वाद्यसंभवात्सप्तमी पंचमी प्राप्त्यर्थं विधिः। एवमधिकशब्देनापि योगे लोके लोकाद्या अधिको हरिरित्या-
दौ पंचमी सप्तमी द्वे यो। तदस्मिन्नधिकं यस्मादधिकमिति च सप्तमीपञ्चम्योर्विधिनिर्देशात्। निरूपितत्वं विभ-
क्त्यर्थः। स्वसंबंध्याधिक्याश्रयवृत्तित्वसंसर्गेण क्रियान्वयि। एवं यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी-
ति सूत्रादाधिक्याद्यर्थककर्मप्रवचनीययुक्ते सप्तमी स्यादिति सर्थकादुप परार्द्धे हरेर्गुणा इत्यादौ सप्तमी। अत्रो-
पोऽधिके चेति सूत्रादुपेत्यस्य कर्मप्रवचनीयः। तद्युक्ते परार्धपदे सप्तमी। प्रतियोगित्वं सप्तम्यर्थः। स्वसंबंध्या

धा
सं

राम
१३९

भा०र०
१४०

140

धिकाश्रयगुणवृत्तित्वेन क्रियान्वयि। उपपदं तासमर्थग्राहकं। एवमधिरीश्वर इति स्त्र्यादैश्वर्ये अधिः कर्मप्र
वचनीयसंज्ञस्तद्युक्ते ऐश्वर्यप्रतियोगिनि तदनुयोगिनि च। अधिरामे भूरधिभुवि राम इत्यादौ पर्यायेण सप्त
मी। अत्र क्रमेण प्रतियोगित्वमनुयोगित्वं च सप्तम्यर्थः। स्वस्वसंबंध्यैश्वर्यसंबंधीतरवृत्तित्वमाख्यातार्थ
संसर्गः॥ अधिस्तासमर्थग्राहकः। रामप्रतियोगिकस्वत्वाश्रयाभूवृत्तित्वप्रतियोगी राम इति च फलि
तोर्थः। तस्मिन्नंस सप्तम्यर्थः शक्यो लाक्षणिको वा सर्वोपि भावनान्वयीति। तदेवं लिंगसंख्याव्यतिरिक्तसुब
र्थमात्रस्य स्थितो भावनान्वयः॥ ॥इतिश्रीखंडदेवविरचिते भाट्टरहस्ये प्रथमः परिच्छेदः॥ ॥शुभंभू
यात्लेखकपाठकयोः॥ ॥श्रीकृष्णायनमः॥ संवत् १९२२ समये चैत्रसुदिचतुर्दश्यां रविवासरान्वितायाम्॥

स्व

राम
१४०

[illegible]

श्लोक २८९०

॥ [illegible] ॥

क॰ ४